भगवन्तं शिवं प्रणम्य मुहुर्मुहुरभ्यर्च्य श्रीफलदलैस्तेन भस्मना च नतोत्तमाङ्गः कृताञ्जलिपुटः पप्रच्छ अधीहि भगवन् वेदसारमुद्धृत्य त्रिपुण्ड्रविधिम् । यस्मादन्यानपेक्षमेव मोक्षोपलब्धिः ।

End:

ये चान्ये काश्यां पुरीषकारिणः प्रतिग्रहरतास्त्यक्तभस्मधारणास्त्यक्तरुद्राक्षधारणास्त्यक्तसोमवारव्रतास्त्यक्तगृहयागास्त्यक्तविश्वेश्वरार्चनास्त्यक्तपञ्चाक्षरजपास्त्यक्तभैरवार्चना भैरवीं घोरादि(रां)यातनां नानाविधां काश्यां परेता भुक्त्वा ततश्शुद्धा मां प्रपद्यन्ते च। अन्तर्गृहे रेतो मूत्रं वा विसृजन्ति तदा तेन सिञ्चन्ते पितृन् . . . ततश्चाप्रमादेन निवसेदप्रमादेन निवसेत् काश्यां लिङ्गरूपे(पि)ण्यामित्युपनिषत् ।

Colophon:— भस्मजाबालोपनिषत् समाप्ता.

No. 668. भस्मजाबालोपनिषत्.
BHASMAJĀBĀLŌPANIṢAD.

Pages, 6. Lines, 10 on a page.

Begins on f.l. 158*b* of the MS. described under No. 247.

Complete. Same as the last.

No. 669. भस्मजाबालोपनिषत्.
BHASMAJĀBĀLŌPANIṢAD.

Pages, 3. Lines, 6 on a page.

Begins on fol. 66*b* of the MS. described under No. 285.

Complete.

This version of the Upaniṣad is said to belong to the Ṛgvēda and is therefore different from that described under No. 667.

Beginning :

अथ जनको ह वैदेहः पैप्पलादेन सह प्रजापतेर्लोकं जगाम। तं गत्वोवाच भोः प्रजापते त्रिपुण्ड्रविधिं ब्रूहीति [होवाच]। तं प्रजापतिरब्रवीत् यथैवेश्वरस्य माहात्म्यं तथैव त्रिपुण्ड्रस्य माहात्म्यमिति [होवाच] ॥

End :

अथ कालाग्निरुद्रः प्रोवाच योगध्यानानां शिव एको ध्येयः शिवङ्करः। सर्वमन्यत् परित्यज्य एतामधीत्य द्विजो वा साम्राज्याधिपतिर्वा गर्भवासान्मुच्यत इत्यों सत्यम्। अथ कालाग्निरुद्रः प्रोवाच सकृज्जप्त्वैव शुचिः पूतकर्मण्यो भवति। द्वितीयं जप्त्वा गाणपत्यमवाप्नोति। तृतीयं जप्त्वा देवमेवानुप्रविशत्यों सत्यम्.

Colophon :—इति ऋग्वेदे भस्मजाबालोपनिषत्समाप्ता ॥

No. 670. भावनोपनिषत्.
BHĀVANŌPANIṢAD.

Pages, 4. Lines, 19 on a page.

Begins on fol. 103*a* of the MS. described under No. 246.

Complete.

In this Upaniṣad the body is likened unto the Śrīcakra by the respective identification of their various parts; and the various activities of the mind are stated to constitute the worship of this Śrīcakra, which is a mystic figure used in the worship of Śakti. The name of the Upaniṣad is due to the fact that in it there is the Bhāvanā or *conception* of the body as the Śrīcakra.

Beginning;

भद्रङ्कर्णेभिरिति शान्तिः। ओं श्रीगुरुपरमकारणभूता शक्तिः केन नवरन्ध्ररूपेण देहः नवशक्तिमयं श्रीचक्रम्। वाराही पितृरूपा कुरुकुल्ला वल्ली देवता माता। पुरुषार्थास्सागराः। देहो नवरत्नद्वीपः। आधारनवकमुद्राशक्तयः।

End:

स्वयं तत्पादुकानिमज्जनं परिपूर्णध्यानम् एवम्मुहूर्तत्रयं भावनया युक्तो जीवन्मुक्तो भवति। तस्य देवात्मैक्यसिद्धिः। चिन्तितकार्याण्ययत्नेन-सिध्यन्ति। स एव शिवयोगीति कथ्यत इत्युपनिषत्॥

Colophon:—भावनोपनिषत्समाप्ता॥

No. 671. भावनोपनिषत्.

BHĀVANŌPANIṢAD.

Pages, 2. Lines, 11 on a page.

Begins on fol. 153*b* of the MS. described under No. 247.

Complete. Same as the last.

No. 672. भावनोपनिषत्.

BHĀVANŌPANIṢAD.

Pages, 4. Lines, 17 on a page.

Begins on fol. 14*a* of the MS. described under No. 522.

Complete.

Though this is called भावोपनिषत् in the colophon, it is identical with भावनोपनिषत्.

No. 673. भावनोपनिषत्.

BHĀVANŌPANIṢAD.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 3. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 21*b*. The other works herein are :—

	Fol.
Ṣaḍāmnāyaḥ	1*a*
Mahāṣōḍaśyuddhāraḥ ..	19*a*
Yōgatattvōpaniṣad ..	19*b*
Bījanirṇayaḥ	20*a*
Ajapāgāyatrī	23*a*
Mantrasandbyā ..	24*b*
Mantravidyā	25*a*
Cakravidyā	25*b*
Cakrastavaḥ	30*b*
Pañcamīstavarājaḥ ..	32*a*
Indrākṣīkavacaḥ ..	37*a*
Tryambakastōtram ..	38*a*
Ṣōḍaśīkalpaḥ	39*a*
Pañcaratnamālā ..	39*a*
Gurupaṅktistavaḥ ..	40*a*
Ṣōḍhānyāsaḥ	40*a*
Grahanyāsaḥ	41*a*
Nakṣatranyāsaḥ ..	41*b*
Yōginīnyāsaḥ	42*a*
Rāśinyāsaḥ	44*b*
Pīṭhanyāsaḥ	45*a*
Mahāṣōḍhānyāsaḥ ..	45*b*
Prapañcanyāsaḥ ..	46*a*
Bhuvananyāsaḥ ..	46*b*
Mūrtinyāsaḥ	47*b*
Mantranyāsaḥ ..	49*a*
Dēvatānyāsaḥ ..	49*a*
Mātṛkānyāsaḥ ..	49*b*
Cintāmaṇimantraḥ ..	51*a*
Khadgamālāstōtram ..	51*b*
Dēvīmānasapūjā ..	53*a*
Kāmakalāsūtram ..	58*a*
Dēvīmānasapūjā ..	61*a*
Siddhāricakram ..	65*a*
Kaṭhapradīpikā ..	68*a*
Pañcadaśīmantravyākhyānam.	84*b*
Rāmadurgam ..	88*b*
Rājarājēśvarīstōtram ..	89*a*
Lalitāsahasranāmastōtram	92*b*
Pañcadaśīkavacam ..	100*a*
Śyāmalāpūjāpaddhatiḥ	103*a*
Cakranyāsakavacaḥ ..	104*a*
Śyāmalāsahasranāmāni	107*a*
Dēvīnāmasārastavaḥ ..	113*a*
Śrīkaṇṭhādimātṛkānyāsaḥ	115*a*
Kēśavādimātṛkānyāsaḥ	116*a*
Tattvanyāsaḥ	117*b*
Aṣṭatriṁśatkalānyāsaḥ	118*a*
Abhiṣēkakalpaḥ ..	119*a*
Chāyāpuruṣalakṣaṇam	125*b*
Ōghatrayam	128*a*
Kuṇḍalinīhōmaprakāraḥ	129*a*
Bālacakradhyānam ..	132*a*

	Fol.		Fol.
Svayaṁvarāmantrakalpaḥ	133*a*	Parāsahasranāmastōtram	150*a*
Bagaḷācakrōddhāraḥ ..	136*b*	Śrīvidyāratnasūtram	159*a*.
Parāprāsādamantrōddhāraḥ	137	Śrīvidyāpūrvōttaratāpinīyam.	161*a*
Saṁviddēvīmantraḥ ..	144*a*	Śrīvidyāviṣayakōpanyāsaḥ	167*a*
Santānagōpālamantraḥ	145*a*	Śrīcakraviṣayōpanyāsaḥ	179*a*
Sannyāsavidhiḥ ..	145*b*	Dhūmāvatīmantraḥ ..	175*a*
Parāṣṭōttaraśatanāmastōtram.	149*a*		

Complete.

The colophon herein is इति कादिमतोक्तभावनाप्रकारेण भावनोपनिषत्समाप्ता ॥

No 674. भावनोपनिषत्.

BHĀVANŌPANIṢAD.

Pages, 3. Lines, 23 on a page.

Begins on fol. 104*b* of the MS. described under No. 169.

Complete.

This is named in the colopohn as भावोपनिषत्.

No. 675. भावनोपनिषत्.

BHĀVANŌPANIṢAD.

Substance, palm-leaf (Śrītāla). Size, $4\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 8. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 24*a*. The other works herein are : Gāyatrīhṛdayam (1*a*), Gāyatrīkavacam (12*a*), Gītāsāraḥ (15*a*), Lalitāsahasranāmastōtram (28*a*), Lalitātriśatistōtram (40*a*), Tripurasundarīkavacaḥ (44*a*), Mantrāvaliḥ (50*a*), Dūtīyajanamantraḥ (84*a*), Saundaryalaharī (119*a*).

Complete.

No. 676. भिक्षुकोपनिषत्.
BHIKṢUKŌPANIṢAD.

Pages, 2. Lines, 21 on a page.

Begins on fol. 289*a* of the MS. described under No. 250.

Complete.

This Upaniṣad classifies the Sannyāsins under the four heads of Kuṭīcaka, Bahūdaka, Haṁsa and Paramahaṁsa, gives the distinguishing marks of, as well as the duties appertaining to, each of these classes, and finally names certain Ṛṣis who are respectively illustrative of these various classes of Sannyāsins.

Beginning:

पूर्णमद इति शान्तिः । अथ भिक्षूणां मोक्षार्थिनां कुटीचकबहूदकहंसपरमहंसाश्चेति चत्वारः । कुटीचको नाम गौतमभारद्वाजयाज्ञवल्क्यवसिष्ठप्रभृतयोऽष्टौ ग्रासांश्चरन्तो योगमार्गे मोक्षमेव प्रार्थयन्ते

End:

तत्र ब्रह्ममार्गे सम्यक् सम्पन्नाः शुद्धमानसाः परमहंसाचरणेन सन्न्यासेन देहत्यागं कुर्वन्ति ते परमहंसा नामेत्युपनिषत् ॥

Colophon :— भिक्षुकोपनिषत्समाप्ता ॥

No. 677. भिक्षुकोपनिषत्.
BHIKṢUKŌPANIṢAD.

Page, 1. Lines, 12 on a page.

Begins on fol. 113*b* of the MS. described under No. 247.

Complete. Same as the last.

No. 678. भिक्षुकोपनिषत्.
BHIKṢUKŌPANIṢAD.

Page, 1. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 277.

Complete. Same as the last.

No. 679. मण्डलब्राह्मणोपनिषत्.

MAṆḌALABRĀHMAṆŌPANIṢAD.

Pages, 12. Lines, 22 on a page.

Begins on fol. 201*b* of the MS. described under No. 250.

Complete.

In this Upaniṣad the meaning and the manner of practical Yōga is taught to Yājñavalkya, by Nārāyaṇa, who is conceived to be within the orb of the sun, Yōga being declared to be a means for the attainment of the highest wisdom.

Beginning :

ओं पूर्णमद इति शान्तिः । याज्ञवल्क्यो ह वै मुनि(रादित्यलोकञ्जगाम । तमादित्यं नत्वा भो भगवन्नादित्यात्मतत्त्वमनुब्रूहीति । स होवाच नारायणः ज्ञानयुक्तयमाद्यष्टाङ्गयोग उच्यते । शीतोष्णाहारनिद्राविजयः सर्वदा शान्तिः निश्चलत्वं विषयेन्द्रियनि)ग्रहश्चैते यमाः । गुरुभक्तिसत्यमार्गानुरक्तिसुखागतवस्त्वनुभव(ा)श्च तद्वस्त्वनुभवेन तुष्टिनि(र्नि)स्सङ्गता एकान्तवासमनोनिवृत्तिफलानभिलाषो वैराग्यभावश्च नियमाः । सुखासनवृत्तिश्चीरवासश्च एवमासननियमा भवन्ति ॥

End :

एवं चिरसमाधिजनितब्रह्मामृतपानपरायणोऽसौ सन्न्यासी परमहंस अवधूतो भवति । तद्दर्शनेन सकलं जगत्पवित्रं भवति । तत्सेवापरोऽ[पि अ]ज्ञोऽपि मुक्तो भवति । तत्कुलमेकोत्तरशतं तारयति । तन्मातृपितृजायापत्यवर्गं च मुक्तं भवतीत्युपनिषत् ॥ पञ्चमं ब्राह्मणम् ।

Colophon :— मण्डलब्राह्मणोपनिषत्समाप्ता ॥

No. 680. मण्डलब्राह्मणोपनिषत्.

MAṆḌALABRĀHMAṆŌPANIṢAD.

Pages, 12. Lines 5. on a page,

Begins on fol. 82*a* of the MS. described under No. 247.

Complete. Same as the last.

No. 681. मन्त्रिकोपनिषत्.

MANTRIKOPANIṢAD.

Pages, 3. Lines, 20 on a page.

Begins on fol. 94*b* of the MS. described under No. 250.

Complete.

In this Upaniṣad the Avyaktavidyā is taught. In this Vidyā or special mode of meditation and worship, the undifferentiated primordial matter and the undifferentiated consciousness are both enjoined to be used as the objects of meditation and worship, they being conceived to be helpful to the worshipper in enabling him to realize the true nature of the Supreme Being.

Beginning:

पूर्णमद इति शान्तिः ।

मन्त्रिकोपनिषत् ।

अष्टपादं शुचिं हंसं त्रिसूत्रमणुमव्ययम् ।
त्रिवर्त्मानं तेजसोऽहं सर्वतः पश्यन्न पश्यति ॥
भूतसम्मोहने काले भिन्ने तमसि वैखरे ।
अन्तः पश्यन्ति सत्त्वस्थाः निर्गुणं गुणगह्वरे ॥

End:

एवं स भगवान् देवं पश्यन्त्यन्ये पुनः पुनः ।
ब्रह्म ब्रह्मेत्यथायान्ति ये विदुर्ब्राह्मणास्तथा ॥
अत्रैव ते लयं यान्ति लीनाश्चाव्यक्तशालिनः ।
लीनाश्चाव्यक्तशालिन इत्युपनिषत् ॥

Colophon:—मन्त्रिकोपनिषत्.

No. 682. मन्त्रिकोपनिषत्.

MANTRIKŌPANIṢAD.

Pages, 2. Lines, 10 on a page.

Begins on fol. 42*a* of the MS. described under No. 247.

Complete. Same as the last.

No. 683. मन्त्रिकोपनिषत्.

MANTRIKŌPANIṢAD.

Pages, 3. Lines, 6 on a page.

Begins on fol. 47*a* of the MS. described under No. 285.

Complete.

Another copy like the preceding.

No. 684. महानारायणोपनिषत्.

MAHĀNĀRĀYAṆŌPANIṢAD.

Pages, 55. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 254.

Complete.

This is the same as Tripādvibhūtimahānārāyaṇōpaniṣad described under No. 518. See therein for descripton and extracts.

No. 685. महानारायणोपनिषत्.

MAHĀNĀRĀYAṆŌPANIṢAD.

Pages, 81. Lines, 12 on a page.

Begins on fol. 98*b* of the MS. described under No. 180.

Complete.

The Śānti given in the beginning is भद्रं कर्णेभिः, &c. ।

No. 686. महानारायणोपनिषत्.

MAHĀNĀRĀYAṆŌPANIṢAD.

Pages, 28. Lines, 7 on a page.

Begins on fol. 19*a* of the MS. described under No. 383.

Wants beginning and end; many leaves are wanting in the middle also.

No. 687. महानारायणोपनिषत्.

MAHĀNĀRĀYAṆŌPANIṢAD.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{3}{4}$ inches. Pages, 29. Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, not old.

Complete. Another copy.

This was copied in the month of Āśvīja of the year Ānanda.

No. 688. महानारायणोपनिषत्.

MAHĀNĀRĀYAṆŌPANIṢAD.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 41. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, not old.

Complete.

The following stanza is found in addition at the end of the colophon of the eighth Adhyāya:—

असाध्ये भ्रूमध्ये विलसति सदाराध्यमिनभं
सदा ध्या(ध्ये)यं श्रीमद्गुरुपदयुगं यश्शिवपदम् ।
लिलेखानन्तास्यो झटिति जलसूत्रान्वयभवः
स एव श्रीनारायणपरमतत्त्वोपनिषदम् ॥

No. 689. महावाक्योपनिषत्.

MAHĀVĀKYŌPANIṢAD.

Pages, 2. Lines, 22 on a page.

Begins on fol. 143*a* of the MS. described under No. 246.

Complete.

In this Upaniṣad the universal illusion of Māyā is taught to be capable of being dispelled by the acquisition of the highest wisdom, which consists in actually realizing the identity of the individual soul with the Supreme Being.

Beginning:

भद्रं कर्णेभिरिति शान्तिः ।

अथ होवाच ब्रह्मा अपरोक्षानुभवपरोपनिषदं व्याख्यास्यामः । गुह्याद्गुह्यतरमेषा न प्राकृतायोपदेष्टव्या । सात्त्विकायान्तर्मुखाय परिशुश्रूषवे । अथ संसृतिविद्यामोक्षयोर्विद्याविद्ये च चक्षुषी उपसंहृत्य विज्ञाय अविद्यालोकान्धस्तमोदृक् ।

End:

सोऽहमर्कः परं ज्योतिरर्कज्योतिरहं शिवः ।
आत्मज्योतिरहं शुक्रः सर्वज्योतिरसावहम् ॥

एतदथर्वशिरोऽधीते प्रातरधीयानो रात्रिकृतं पापं नाशयति . . . सर्ववेदपारायणपुण्यं लभते । श्रीमहाविष्णुसायुज्यमवाप्नोति । इत्युपनिषत् ।

Colophon:—महावाक्योपनिषत् समाप्ता ।

No. 690. महावाक्योपनिषत्.

MAHĀVĀKYŌPANIṢAD.

Pages, 2. Lines, 11 on a page.

Begins on fol. 168*a* of the MS. described under No 247.

Complete. Same as the last.

No. 691. महोपनिषत्.
MAHŌPANIṢAD.

Pages, 56. Lines, 23 on a page.

Begins on fol. 289*b* of the MS. described under No. 250.

Complete.

After explaining that the universe has proceeded from Nārāyaṇa who was in the beginning one without a second, this Upaniṣad deals with the illusory and unreal nature of the universe, and then it describes the unity of God by means of two dialogues, one being between Śuka and Janaka and the other between Nidāgha and Ṛbhu.

Beginning:

आप्यायन्त्विति शान्तिः । अथातो महोपनिषदं व्याख्यास्यामः । तदाहुरेको ह वै नारायण आसीत् न ब्रह्मा नेशानो नापो नाग्नीषोमौ नेमे द्यावापृथिवी न नक्षत्राणि न सूर्यो न चन्द्रमास्स एकाकी न रमेत । तस्य ध्यानान्तस्थस्य यज्ञस्तोममु(उ)च्यते । तस्मिन्पुरुषाश्चतुर्दशाजायन्ते(न्त) ॥

End:

संशान्तनवसंवेद्यं संविन्मात्रमहम्महत् ।
संशान्तसर्वसङ्कल्पः प्रशान्तसकलैषणः ॥
निर्विकल्पपदं गत्वा स्वस्थो भव मुनीश्वर ।

य इमां महोपनिषदं ब्राह्मणो नित्यमधीते अश्रोत्रियः श्रोत्रियो भवति . . .

आसप्तमान् पुरुषयुगान् पुनाति इत्याह भगवान् हिरण्यगर्भः । जाप्येनामृतत्वं च गच्छति । इत्युपनिषत् । षष्ठोऽध्यायः ॥

Colophon:—महोपनिषत्समाप्ता ॥

No. 692. महोपनिषत्.
MAHŌPANIṢAD.

Pages, 20. Lines, 12 on a page.

Begins on fol. 113*b* of the MS. described under No. 247.

Complete. Same as the last.

No. 693. महोपनिषत्.
MAHŌPANIṢAD.

Pages, 2. Lines, 6 on a page.

Begins on fol. 49*a* of the MS. described under No. 285.

Contains only a portion of the first Adhyāya.

No. 694. माण्डूक्योपनिषत्.
MĀṆḌŪKYŌPANIṢAD.

Pages, 2. Lines, 11 on a page.

Begins on fol. 2*a* of the MS. described under No. 203.

Complete.

This Upaniṣad describes the meaning and the power of Praṇava as a means of knowing the nature and the reality of the self. A number of Ślōkas by Gauḍapāda in interpretation of the Upaniṣad is considered by some to form part of the Upaniṣad itself. They are divided into four Prakaraṇas, and expound the Advaita school of the Vēdānta, and are intended to meet certain objections that may be raised against that school.

In this MS. the first Prakaraṇa of Gauḍapādakārikā is mixed up with the Upaniṣad; and therefore the extract from the end happens to be a passage of the Kārikā. For the end of the Upaniṣad itself see under the next number.

Beginning:

ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव। यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव। सर्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पाज्जागारितस्थानो बहिःप्रज्ञस्सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः। स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक्तैजसो द्वितीयः पादः॥

End:

सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च।
एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम्॥

प्रणवं हीश्वरं विद्यात् सर्वस्य हृदये स्थितम् ।
सर्वव्यापिनमोङ्कारं मत्वा धीरो न शोचति ॥
अमात्रोऽनन्तमात्रश्च प्रपञ्चोपशमश्शिवम् ।
ओङ्कारो विदितो येन स मुनिर्नेतरो जनः ॥

Colophon :—इति माण्डूक्योपनिषत्समाप्ता ॥

No. **695**. माण्डूक्योपनिषत्.

MĀṆḌŪKYŌPANIṢAD.

Pages, 2. Lines, 5 on a page.

Begins on fol. 25*a* of the MS. described under No. 292.

Complete.

This codex gives the Upaniṣad alone, and the final passage is as given below :—

End :

अमात्रश्चतुर्थो व्यवहार्यप्रपञ्चोपशमः शिवोऽद्वैतमोङ्कार आत्मैव संविशति । आत्मनात्मानं य एवं वेदेत्युपनिषत्.

There is another copy of the Upaniṣad on fol. (38*a*) extending over two pages; and on fol. (39*a*) the Kārikā of Gauḍapāda containing only the Āgamaprakaraṇa is found.

No. **696**. माण्डूक्योपनिषत्.

MĀṆḌŪKYŌPANIṢAD.

Pages, 3. Lines, 6 on a page.

Begins on fols. 16*a* and 8*a* of the MS. described under No. 300.

Complete.

Another copy of the preceding.

No. 697. माण्डूक्योपनिषत्.

MĀṆḌŪKYŌPANIṢAD.

Pages, 2. Lines, 15 on a page.

Begins on fol. 140*a* of the MS. described under No. 302.

Complete.

Another copy. There is yet another copy of this work herein beginning on fol. 141*a* and extending over two pages.

No. 698. माण्डूक्योपनिषत्.

MĀṆḌŪKYŌPANIṢAD.

Pages, 4. Lines, 6 on a page.

Begins on fol. 20*a* of the MS. described under No. 116.

Complete.

Another copy.

No 699. माण्डूक्योपनिषत्.

MĀṆḌŪKYŌPANIṢAD.

Pages, 3. Lines, 8 on a page.

Begins on fol. 55*b* of the MS. described under No. 276.

Complete.

Another copy. The Śānti is herein given as भद्रं कर्णेभिरिति शान्तिः ।

No. 700. माण्डूक्योपनिषत्.

MĀṆḌŪKYŌPANIṢAD.

Pages, 6. Lines, 10 on a page.

Begins on fol. 114*b* of the MS. described under No. 180.

Complete.

Another copy like the one described under No. 694.

No. 701. माण्डूक्योपनिषत्.

MĀṆḌŪKYŌPANIṢAD.

Pages, 7. Lines, 5 on a page.

Begins on fol. 32*b* of the MS. described under No. 284.

Complete.

Another copy like the preceding.

No. 702. माण्डूक्योपनिषत्.

MĀṆḌŪKYŌPANIṢAD.

Pages, 2. Lines, 6 on a page.

Begins on fol. 18*b* of the MS. described under No. 256.

Complete.

There is another copy of the same work herein beginning on fol. (20*a*) of the MS.; it is in Grantha characters and extends over four pages; it is like the one described under No. 694.

No. 703. माण्डूक्योपनिषत्.

MĀṆḌŪKYŌPANIṢAD.

Pages, 5. Lines, 12 on a page.

Begins on fol. 22*a* of the MS. described under No. 309.

Complete. Same as the one described under No. 694.

No. 704. माण्डूक्योपनिषद्भाष्यम्.

MĀṆḌŪKYŌPANIṢADBHĀṢYAM.

Pages, 111. Lines, 16 on a page.

Begins on fol. 142*a* of the MS. described under No. 302.

Complete.

This commentary by Śaṅkarācārya is on the Upaniṣad as well as on the Gauḍapādakārikā.

Beginning:

प्रज्ञानांशुप्रतानैः स्थिरचरनिकरव्यापिभिर्व्याप्य लोकान्
भुक्त्वा भोगान् स्थविष्ठान् पुनरपि धिषणोद्भासितान् कामजन्यान् ।
पीत्वा सर्वान् विशेषान् स्वपिति मधुरभुङ्मायया मोहयन्नो
मायासङ्घ्यातुरीयं परममृतमजं ब्रह्म यत्तन्नतोऽस्मि ॥
यो विश्वात्मा विधिजविषयान् प्राश्य भोगांस्स्थविष्ठान्
पश्चाच्चान्यान्स्वमतिविभवान् ज्योतिषा स्वेन सूक्ष्मान् ।
सर्वानेतान् पुनरपि शनैः स्वात्मनि स्थापयित्वा
खात्वा सर्वान् विशेषान् विगतगुणगणः पात्वसौ नस्तुरीयः ॥

ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं वेदान्तार्थसारसङ्ग्रहभूतमिदं प्रकरणचतुष्टयमोमित्येतदक्षरमित्याद्यारभ्यते । अत एव न पृथक् संबन्धाभिधेयप्रयोजनानि वक्तव्यानि । यान्येव तु वेदान्ते संबन्धाभिधेयप्रयोजनानि तान्येवेह भवितुमर्हन्ति तथापि प्रकरणव्याचिख्यासुना संक्षेपतो वक्तव्यानीति मन्यन्ते व्याख्यातारः . . .

ब्रह्मविद्याप्रकाशनायास्यारम्भः क्रियते । यत्र हि द्वैतमिव भवति यत्रान्यदिव स्यात् तत्रान्योऽन्यत्पश्येदन्योऽन्याद्विजानीयादिति । यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं विजानीयादित्यादिश्रुतिभ्योऽस्यार्थस्य सिद्धिः । तत्र तावदोङ्कारनिर्णयाय प्रथमम्प्रकरणम् आगमप्रधानमात्मतत्त्वप्रतिपत्त्युपायभूतम् । यस्य द्वैतप्रपञ्चोपशमे अद्वैतप्रतिपत्तिः रज्ज्वामिव सर्पादिविकल्पोपशमे रज्जुतत्त्वप्रतिपत्तिः तस्य द्वैतस्य हेतुतो वैतथ्यप्रतिपादनाय द्वितीयं प्रकरणम् । तथा अद्वैतस्यापि वैतथ्यप्रसङ्गप्राप्तौ युक्तितः तथात्वप्रदर्शनाय तृतीयं प्रकरणम् । अद्वैतस्य तथात्वप्रतिपत्तेः प्रतिपक्षभूतानि यानि वादान्तराण्यवैदिकानि तेषामन्योन्यविरोधित्वादतथार्थत्वेन तदुपपत्तिभिरेव निराकरणाय चतुर्थं प्रकरणम् । कथं पुनरोङ्कारनिर्णयमात्मतत्त्वप्रतिपत्त्युपायत्वं प्रतिपद्यत इत्युच्यते । ओमित्येतदालम्बनमेतद्वै सत्यकाम ओमित्यात्मानं युञ्जीत ओमिति ब्रह्म ओङ्कार एवेदं सर्वमित्यादिश्रुतिभ्यः रज्ज्वादिरिव सर्पादिविकल्पस्यास्पदः(म्)।

End :

अव्यवहार्यमपि व्यवहारगोचरमापाद्य यथाबलं यथाशक्तीत्यर्थः ॥

अजमपि जनियोगं प्रापदैश्वर्ययोगात्
अगति च गतिमत्तां प्रापदेकं ह्यनेकम् ।
विविधविषयधर्मग्राहिमुग्धेक्षणानां
प्रणतभयविहन्तृ ब्रह्म यत्तन्नतोऽस्मि ॥
प्रज्ञावैशाखवेधक्षुभितजलनिधेर्वेदनाम्नोऽन्तरस्थं
भूतान्यालोक्य मग्नान्यविरतजननग्राहघोरे समुद्रे ।
कारुण्यादुद्दधारामृतमिदममरैर्दुर्लभं भूतहेतोः
यस्तं पूज्याभिपूज्यं परमगुरुममुं पादपातैर्नतोऽस्मि ॥
यत्प्रज्ञालोकभासा प्रतिहतिमगमत्स्वान्तमोहान्धकारो
मज्जन्मज्जंश्च घोरे ह्यसकृदप(पि) जनोदन्वति त्रस्यतो ये ।
यत्पादावाश्रितानां श्रुतिशश(त)विनयप्राप्तिरग्राह्यमोघा
तत्पादौ पा(भा)वनीयो(यौ) भवभयविनुदौ सर्वभावैर्नमस्ये ॥

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादाशिष्यस्य शङ्करभगवतः कृतौ आगमशास्त्रविवरणे अलातशान्त्याख्यं चतुर्थं प्रकरणं समाप्तम् ॥ समाप्तोऽयं ग्रन्थः ॥

राम त्वत्पादकमलं न त्यक्ष्यामि कदाचन ।
यथार्थमर्थप्रवरं तस्मान्मां पाहि राघव ॥

No. 705. माण्डूक्योपनिषद्भाष्यटिप्पणम्.

MĀṆḌŪKYŌPANIṢADBHĀṢYAṬIPPAṆAM.

Pages, 77. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 316.

To the end of Prakaraṇa I.

This is a gloss by Ānandātman on Śaṅkarācārya's commentary on the Upaniṣad and on the Kārikā of Gauḍapāda.

Beginning:

भद्रं कर्णेभिरिति शान्तिः ।

परिपूर्णपरिज्ञानपरितृप्तिमते सते ।
विष्णवे जिष्णवे तस्मै कृष्णनामवते नमः ॥
सिद्धानन्दपदाम्भोजद्वन्द्वमद्वन्द्वतास्पदम् ।
नमस्कुर्वे पुरस्कर्तुं तत्त्वज्ञानमहोदयम् ॥
गौडपादीयभाष्यं हि प्रसन्नमिव लक्ष्यते ।
तदर्थतोऽतिगम्भीरं व्याकरिष्ये स्वशक्तितः ॥
पूर्वे यद्यपि विद्वांसो व्याख्यानानीह चक्रिरे ।
तथापि मन्दबुद्धीनामुपकाराय यत्यते ॥
श्रीगौडपादाचार्यस्य[श्री] नारायणप्रसादतः ।

प्रतिपन्नान्माण्डूक्योपनिषदर्थाविष्करणपदानपि श्लोकानाचार्यप्रणीतान् व्याचिख्यासुः भगवान् भाष्यकारः चिकीर्षितस्य भाष्यस्याविघ्नपरिसमाप्त्यादिसिद्धये परदेवतातत्त्वानुस्मरणपूर्वकं नमस्काररूपं मङ्गलाचरणं शिष्टाचारप्रमाणकं मुखतः समाचरन्नर्थादपेक्षितं अभिधेयानुबन्धमपि सूचयति प्रज्ञामेत्यादिना ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यशुद्धानन्दपूज्यपादशिष्यश्रीमदानन्दात्मकृतौ माण्डूक्यभाष्यटीकायां प्रथमं प्रकरणं समाप्तम् ॥

No. 706. माण्डूक्योपनिषद्भाष्यटिप्पणम्.

MĀṆḌŪKYŌPAṆIṢADBHĀṢYAṬIPPAṆAM.

Pages, 277. Lines, 16 on a page.

Begins on fol. 198*a* of the MS. described under No. 302.

Another copy; this contains the first three Prakaraṇas completely while the fourth is incomplete. The various colophons are:—

इति श्रीमत्परमहंसपरिव्राजकाचार्यशुद्धानन्दपूज्यपादशिष्यश्रीमदानन्दात्मकृतौ माण्डूक्यभाष्यानन्दगिरीयः समाप्तः ॥

इति श्रीमदानन्दपूज्यपादशिष्यभगवदानन्दविरचितायां गौडपादभाष्यटीकायां द्वितीयं प्रकरणं समाप्तम् ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानविराचितायां गौडपादभाष्यटीकायां तृतीयं प्रकरणं समाप्तम् ॥

End:

प्रतिष्ठिता सिद्ध्यति यस्मादमोघा सकला श्रवणादीनां प्राप्तिस्तस्मादग्र्यत्वं तस्यां सम्भाव्यते तदेवमाचार्यप्रसादादात्मनोऽन्येषां च बहूनां पुरुषार्थपरिसमा . .

No. 707. माण्डूक्योपनिषद्दीपिका.
MĀṆḌŪKYŌPANIṢADDĪPIKĀ.

Pages, 9. Lines, 6 on a page.

Begins on fol. 34*a* of the MS. described under No. 292.

Complete.

This is a commentary by Śaṅkarānanda on the Upaniṣad.

Beginning:

माण्डूक्योपनिषद्व्याख्यां करिष्ये पदचारिणीम् ।
ओमात्माभेदसंबोधादानन्दात्मप्रकाशिनीम् ॥

नामनामिनोर्लोके भेदस्य प्रसिद्धत्वात्प्रस्तुतश्चो(स्यो)ङ्कारस्य ब्रह्मविवर्तत्वात् विवर्तस्य विवर्ताधिष्ठानेन भेदशून्यत्वात् अत ओङ्कारं ब्रह्मनामधेयं ब्रह्मदृष्ट्याह ओमिति ब्रह्मबुद्ध्या दृष्टो द्रष्टृन् इति ओमिति ओङ्कारानुकरणार्थः

End:

एवमुक्तेन प्रकारेण ओङ्कारात्मनोः तादात्म्यं वेद जानाति तस्य ओङ्काररूपानन्दात्मप्राप्तिफलमर्थसिद्ध . . . . ॥

Colophon:—आनन्दात्मपूज्यपदिशिष्यश्रीशङ्करानन्दभगवतः कृतिः माण्डूक्योपनिषद्दीपिका समाप्ता ॥

No. 708. माण्डूक्योपनिषद्भाष्यम्.

MĀṆḌŪKYŌPANIṢADBHĀṢYAM.

Pages, 13. Lines, 12 on a page.

Begins on fol. 16*b* of the MS. described under No. 31.

Complete.

This commentary is by Ānandatīrtha.

Beginning:

पूर्णानन्दज्ञानशक्तिस्वरूपं नित्यमव्ययम् ।
चतुर्धा सर्वभोक्तारं वन्दे विष्णुं परं पदम् ॥
मण्डूकरूपी(पि) [वरु]णा वरुणेन चतूरूपो नारायणस्स्तूयते ।
ध्यायेन्नारायणं देवं प्रणवेन समाहितः ।
मण्डूकरूपी वरुणस्तुष्टाव हरिमव्ययम् ॥ इति पाद्मे ॥
ओमित्युक्तं तु यद्ब्रह्म तदक्षरमुदाहृतम् ।
ओं नमस्त्रिजगद्यस्मादों तस्माद्भगवान् हरिः ॥
तदिदं गुणपूर्त्यैव सर्वमित्येव शब्दितम् ।
भाविभूतभवत्कालेष्वेकरूपतया हरिः ॥
सर्वदा नित्य इत्येषा व्याख्योङ्कारस्य कीर्तिता ।
इति बृहत्संहितायाम् ॥
ओमित्याक्रियते यस्मादोङ्कारोऽसावतः परः ।
सर्वत्वमिति पूर्णत्वं तन्नान्यस्य हरेः क्वचित् ॥ इति नैर्गुण्ये ।

सर्वमोङ्कार एवेत्यन्यस्य पूर्णत्वनिराकरणम्। त्रिकालातीतत्वं च तस्यैव प्रकृतेऽपि त्रिकालातीतत्वं विद्यत इति अन्यादिति विशेषणम्। परमं यो महद्ब्रह्म परमं कवीनां पूर्णमदः पूर्णमित्यादिषु प्रसिद्धं च ब्रह्मणः पूर्णत्वमित्याह सर्वं ह्येतद्ब्रह्मेति । श्रीब्रह्मादिसकलदेहेषु स्थित्वा आदानादिकर्ता योऽयं कश्चित्प्रतीयते जीवानामस्वातन्त्र्यदर्शनात् सोऽपि स एवेति दर्शयति अयमात्मा ब्रह्मेति

End :

ओमित्याक्रियमाणत्वादोङ्कारस्संप्रकीर्तितः ।
आदिमत्वादयो ह्यर्था ओमित्यस्य श्रुतौ श्रुताः ॥
अपूर्वकारणाभावात् नाशाभावादनन्तरः ।
पराधीनस्थित्यभावादनपार उदाहृतः ॥
सर्वाङ्गत्वादबाह्यश्च तं ज्ञात्वा विप्रमुच्यते । इति च ।
परत्वमपरत्वं च विष्णो(रे)कस्य वै यदा ।
श्रूयते न तु सामर्थ्यभेदस्तत्र कथंचन ॥
अवतारस्य पूर्वत्वात् पौर्वापर्यमुदाहृतम् । इति ब्रह्मतर्के ।
पूर्वावतारे पश्चिमावतारोऽपि पूर्ण एवेति प्रणवो ह्यपरं ब्रह्मेत्यादेरर्थः ।
एकोऽपि निर्विशेषोऽपि चतुर्धा व्यवहारभाक् ।
यस्तं वन्दे चिदानन्दं विष्णुं विश्वादिरूपिणम् ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचितं माण्डूक्योपनिषद्भाष्यं समाप्तम् ॥

No. 709. माण्डूक्योपनिषद्भाष्यम्.

MĀṆḌŪKYŌPANIṢADBHĀṢYAM.

Pages, 14. Lines, 13 on a page.

Begins on fol. 15*b*. of the MS. described under No. 309.

Complete. Same as the last.

No. 710. मुक्तिकोपनिषत्.

MUKTIKŌPANIṢAD.

Pages, 18. Lines, 21 on a page.

Begins on fol. 200*a* of the MS. described under No. 246.

Complete.

In this Upaniṣad Rāma teaches Hanūmat the names of the 108 Upaniṣads, assigning each of them to the particular Vēda to which it belongs and mentioning the Śānti-prayer which is associated with each of them. There are also two different kinds of Mukti or liberation mentioned and explained herein.

Beginning :

पूर्णमद इति शान्तिः ।

अयोध्यानगरे रम्ये रत्नमण्डपमध्यके ।
सीताभरतसौमित्रिशत्रुघ्नाद्यैः समन्वितम् ॥

* * * *

भक्त्या शुश्रूषया रामं स्तुवन्पप्रच्छ मारुतिः ॥
त्वद्रूपं ज्ञातुमिच्छामि तत्त्वतो राम मुक्तये ।
अनायासेन येनाहं मुच्येयं भवबन्धनात् ॥

* * * *

राम वेदाः कतिविधाः तेषां शाखाश्च राघव ।
तासूपनिषदः कास्स्युः कृपया वद तत्त्वतः ॥
ऋग्वेदादिविभागेन वेदाश्चत्वार ईरिताः ।
तेषां शाखा ह्यनेकाः स्युः तासूपनिषदः तथा ॥
ऋग्वेदस्य तु शाखाः स्युरेकविंशतिसङ्ख्यया ।
नवाधिकशतं शाखा यजुषो मारुतात्मज ॥
सहस्रसङ्ख्यया जाताः शाखास्साम्नः परंतप ।
अथर्वणस्य शाखाः स्युः पञ्चाशद्भेदतो हरे ॥
एकैकस्यास्तु शाखायाः एकैकोपनिषन्मता ।

* * * *

इदं कैवल्यमुक्तिस्तु केनोपायेन लभ्यते ।
माण्डूक्यमेकमेवालं मुमुक्षूणां विमुक्तये ॥

तथाप्यसिद्धं चेज्ज्ञानं दशोपनिषदं पठ ।
ज्ञानं लब्ध्वाचिरादेव मामकं धाम यास्यसि ॥
तथापि दृढता नो चेद्विज्ञानस्याञ्जनासुत ।
द्वात्रिंशाख्योपनिषदं समभ्यस्य निवर्तय ॥
विदेहमुक्ताविच्छा चेदष्टोत्तरशतं पठ ।
तासां क्रमं सशान्तिं च शृणु वक्ष्यामि तत्त्वतः ॥
ईशकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरिः ।
ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा ॥
ब्रह्मकैवल्यजाबालश्वेताश्वा हंस आरुणिः ।
गर्भो नारायणो हंसः बिन्दुनादशिरःशिखाः ॥
मैत्रायणी कौषीतकी बृहज्जाबालतापिनी ।
कालाग्निरुद्रमैत्रेयीसुबालक्षुरिमन्त्रिका ॥
सर्वसारं निरालम्बं रहस्यं वज्रसूचिकम् ।
तेजोनादध्यानविद्यायोगतत्त्वावबोधकम् ॥
परिव्राट् त्रिशिखी सीता चूडा निर्वाणमण्डलम् ।
दक्षिणां शरभं स्कन्दं महानारायणाद्वयम् ॥
रहस्यं रामतपनं वासुदेवं च मुद्गलम् ।
शाण्डिल्यं पैङ्गलं भिक्षुर्महच्छारीरकं शिखा ॥
तुरीयातीतसन्न्यासपरिव्राजाक्षमालिका ।
अव्यक्तैकाक्षरं पूर्णा सूर्याक्ष्यध्यात्मकुण्डिका ॥
सावित्र्यात्मा पाशुपतं परब्रह्मावधूतकम् ।
त्रिपुरातपनं देवी त्रिपुरा कठभावना ॥
हृदयं कुण्डली भस्मरुद्राक्षगणदर्शनम् ।
तारसारमहावाक्यपञ्चब्रह्माग्निहोत्रकम् ॥

गोपालतपनं कृष्णं याज्ञवल्क्यं वराहकम् ।
शाठ्यायनीं हयग्रीवं दत्तात्रेयं च गारुडम् ॥
कलिजाबालिसौभाग्यरहस्यऋचमुक्तिकाः ।
एवमष्टोत्तरशतं भावनात्रयनाशनम् ।
ज्ञानवैराग्यदं पुंसां वासनात्रयनाशनम् ॥

* * * *

अथ हैनं श्रीरामचन्द्रं मारुतिः पप्रच्छ ऋग्वेदादिविभागेन पृथक्छा-तिमनुब्रुहीति ।

स होवाच श्रीरामः ।

1. ऐतरेय
2. कौषीतकी
3. नादबिन्दु
4. आत्मप्रबोध
5. निर्वाण
6. मुद्गल
7. अक्षमालिका
8. त्रिपुरा
9. सौभाग्य
10. बह्वृचानाम्

ऋग्वेदगतानां दशसङ्ख्याकानामुपनिषदां वाङ्मे मनसीति शान्तिः ॥

1. ईशावास्य
2. बृहदारण्यक
3. जाबाल
4. हंस
5. परमहंस
6. सुबाल
7. मन्त्रिका
8. निरालम्ब
9. त्रिशिखीब्राह्मण
10. मण्डलब्राह्मण
11. अद्वयतारक
12. पैङ्ग
13. भिक्षु
14. तुरीयातीत
15. अध्यात्म
16. तारसार
17. याज्ञवल्क्य
18. शाठ्यायनी
19. मुक्तिकानां

शुक्लयजुर्वेदगतानामेकोनविंशतिसङ्ख्याकानामुपनिषदां पूर्णमद इति शान्तिः ॥

1. कठवल्ली
2. तैत्तिरीयक
3 ब्रह्म
4 कैवल्य
5. श्वेताश्वतर
6. गर्भ
7. नारायण
8. अमृतबिन्दु
9. अमृतनाद
10. कालाग्निरुद्र
11. क्षुरिका
12. सर्वसार
13 शुकरहस्य
14. तेजोबिन्दु
15. ध्यानबिन्दु
16. ब्रह्मविद्या
17. योगतत्त्व
18. दक्षिणामूर्ति
19. स्कन्द
20. शारीरक
21. योगशिखा
22. एकाक्षर
23. अक्षि
24. अवधूत
25. कठ
26. रुद्रहृदय
27. योगकुण्डलिनी
28. पञ्चब्रह्म
29. प्राणाग्निहोत्र
30. वराह
31. कलिसन्तारण
32. सरस्वतीरहस्यानां

कृष्णयजुर्वेदगतानामुपनिषदां द्वात्रिंशत्सङ्ख्याकानां सह नाववत्विति शान्तिः ॥

1. केन
2. छान्दोग्य
3. आरुणि
4. मैत्रायणी
5. मैत्रेयी
6. वज्रसूचिक
7. योगचूडामणि
8. वासुदेव
9. मह
10. सन्न्यास
11. अव्यक्त
12. कुण्डिका
13. सावित्री
14. रुद्राक्षजाबाल
15. दर्शन
16. जाबालीनां

सामगतानां षोडशसङ्ख्याकानामुपनिषदामाप्यायन्त्विति शान्तिः ॥

1. प्रश्न	17. सूर्य
2. मुण्डक	18. आत्मा
3. माण्डूक्य	19. पाशुपत
4. अथर्वशिरस्	20 परं ब्रह्म
5. अथर्वशिखा	21. त्रिपुरातापन
6. बृहज्जाबाल	22. देवी
7. नृसिंहतापिनी	23. भावना
8. नारदपरिव्राजक	24. भस्मजाबाल
9. सीता	25. गणपति
10. शरभ	26. महावाक्य
11. महानारायण	27. गोपालतपन
12. रामरहस्य	28. कृष्ण
13 रामतापिनी	29. हयग्रीव
14. शाण्डिल्य	30. दत्तात्रेय
15. परमहंसपरिव्राजक	31. गारुडानाम्
16. अन्नपूर्ण	

अथर्ववेदगतानामेकत्रिंशत्सङ्ख्याकानामुपनिषदां भद्रं कर्णेभिरिति शान्तिः ।

End:

जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते ।
विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव ॥

तदेतदृचाभ्युक्तम् । तद्विष्णोः परमं पदꣳसदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते । विष्णोर्यत्परमं पदम् । ओं सत्यमित्युपनिषत् ॥

Colophon:— मुक्तिकोपनिषत् समाप्ता ॥ हरिःओम् ॥

No. 711. मुक्तिकोपनिषत्.

MUKTIKŌPANIṢAD.

Pages, 7. Lines, 12 on a page.

Begins on fol. 188*b* of the MS. described under No. 247.

Complete. Same as the last.

No. 712. मुक्तिकोपनिषत्.

MUKTIKŌPANIṢAD.

Pages, 30. Lines, 7 on a page.

Begins on fol. 4*a* of the MS. described under No. 383.

Complete.

Another copy.

No. 713. मुण्डकोपनिषत्.

MUṆḌAKŌPANIṢAD.

Pages, 7. Lines, 16 on a page.

Begins on fol. 112*a* of the MS. described under No. 302.

Complete.

After teaching that the wisdom acquired by the study of the Vēdas and the Śāstras is lower and that the other wisdom which results from the knowledge of the Immortal One is higher, and that Karma unassociated with wisdom leads to bondage, while Karma associated with wisdom leads to the salvation of Mōkṣa, this Upaniṣad treats of the characteristics of the Supreme Being as well as of the nature and the origin of the universe. It enjoins renunciation and asceticism and Yōgic meditation as the means of attaining the higher wisdom, and almost discards the Vēdic religion of rituals.

Beginning :

ओं भद्रं कर्णेभिः . . दधातु । ओं शान्तिः ।

ओं ब्रह्मा देवानां प्रथमस्संबभूव । विश्वस्य कर्ता भुवनस्य गोप्ता । स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह । आथर्वणेयीं प्रवदेत ब्रह्माथर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम् । स भारद्वाजाय सत्यवहाय प्राह । भारद्वाजोऽङ्गिरसे परावराम् । शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपपन्नः पप्रच्छ कस्मिन् भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति । तस्मै स होवाच द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति । परा चैवापरा च

End :

क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः स्वयं जुह्वत एकऋषिं श्रद्धयन्तः । तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम् । तदेतत् सत्यम् ऋषिरङ्गिराः पुरोवाच नैतदचीर्णव्रतोऽधीते । नमः परमऋषिभ्यो नमः परमऋषिभ्यः । ओं भद्रं कर्णेभिः . . . दधातु । ओं शान्तिश्शान्तिः शान्तिः ॥ ओं तत्सद्ब्रह्मार्पणमस्तु ।

Colophon :— मुण्डकोपनिषत्समाप्ता ॥

No. 714 मुण्डकोपनिषत्.

MUṆḌAKŌPANIṢAD.

Pages, 16. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 322.

Complete.

Another copy.

The Śanti is herein omitted.

No. 715. मुण्डकोपनिषत्.

MUṆḌAKŌPANIṢAD.

Pages, 12. Lines, 12 on a page.

Begins on fol. 111*a* of the MS. described under No. 180.

Complete.

Another copy.

No. 716. मुण्डकोपनिषत्.

MUṆḌAKŌPANIṢAD.

Pages, 9. Lines, 8 on a page.

Begins on fol. 68*b* of the MS. described under No. 276.

Complete.

Another copy.

No. 717. मुण्डकोपनिषत्.

MUṆḌAKŌPANIṢAD.

Pages, 5. Lines, 8 on a page.

Begins on fol. 111*a* of the MS. described under No. 304.

Complete.

Another copy.

No. 718. मुण्डकोपनिषत्.

MUṆḌAKŌPANIṢAD.

Pages, 13. Lines, 10 on a page.

Begins on fol. 32*a* of the MS. described under No. 309.

Complete. Same as the last.

The colophon in this MS. runs thus :— इत्याथर्वणोपनिषत्समाप्ता.

No. 719. मुण्डकोपनिषद्भाष्यम्.
MUṆḌAKŌPANIṢADBHĀṢYAM.

Pages, 59. Lines, 6 on a page.

Begins on fol. 126*b* of the MS. described under No. 312.

Complete.

This is a commentary by Śaṅkarācārya on the Upaniṣad.

Beginning:

ब्रह्मा देवानामित्याद्याथर्वणोपनिषदस्याश्च विद्यासंप्रदायपारम्पर्यलक्षणं संबन्धमादावेवाह स्वयमेव स्तुत्यर्थम् एवं हि महद्भिः परमपुरुषार्थसाधनत्वेन गुरुणायासेन लब्धा विद्येति श्रोतृबुद्धिप्ररोचनाय विद्यामङ्गीकरोतीति स्तुत्या प्ररोचितायां विद्यायां सादराः प्रवर्तेयुरिति। प्रयोजनेन तु विद्यायाः साध्य-साधनलक्षणं सम्बन्धमुत्तरत्र वक्ष्यति भिद्यते हृदयग्रन्थिरित्यादिना ।

End:

यया विद्यया परया अक्षरमद्रेश्यादिविशेषणं तदेवाक्षरं पुरुषशब्द-वाच्यं पूर्णत्वात्पुरि शयनाच्च सत्यं तदेव परमार्थस्वभावादव्ययमक्षरं चाक्ष-राणामक्षरत्वाच्च . . . आचार्यस्याप्ययमेव न्यायः प्राप्तशिष्य-निस्तारणमविद्यामहोदधेः ।

अथर्वणमन्त्रोपनिषद्विवरणे प्रथममुण्डकस्समाप्तः ॥

नैतद्ग्रन्थरूपमचीर्णव्रतोऽचरितव्रतो नाप्यधीते न पठति चीर्ण-व्रतस्य हि विद्या फलाय संस्कृता भवतीति समाप्ता ब्रह्मविद्या। सा येभ्यो ब्रह्मादिभ्यः पारम्पर्यक्रमेण संप्राप्ता तेभ्यो नमः परमऋषिभ्यः । परं ब्रह्म साक्षाद्दृष्टवन्तो ये ब्रह्मादयोऽवगतवन्तश्च ते परमर्षयः तेभ्यो भूयोऽपि नमः । द्विर्वचनमत्यन्तादरार्थं मुण्डकसमाप्त्यर्थं च ॥

Colophon:

श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्री-मच्छंकरभगवतः कृतौ अथर्वणोपनिषद्विवरणं समाप्तम् ॥

No. 720. मुण्डकोपनिषद्भाष्यम्.
MUṆḌAKŌPANIṢADBHĀṢYAM.

Pages, 47. Lines, 15 on a page.

Begins on fol. 116*a* of the MS. described under No. 302.

Complete.

Another copy of the commentary by Śaṅkarācārya.

No. 721. मुण्डकोपनिषद्भाष्यम्.
MUṆḌAKŌPANIṢADBHĀṢYAM.

Pages, 34. Lines, 9 on a page.

Begins on fol. 73*a* of the MS. described under No. 311.

Complete. Same as the last.

No. 722. मुण्डकोपनिषद्भाष्यटिप्पणम्.
MUṆḌAKŌPANIṢADBHĀṢYAṬIPPAṆAM.

Pages, 32. Lines, 6 on a page.

Begins on fol. 71*a* of the MS. described under No. 312.

Complete.

This is a gloss by Śivānandayatīśa on Śaṅkarācārya's commentary, as made out from the colophon found in the copy described under the next number.

Beginning:

पाशीकृतात्मसंसृतिराशिच्छेदप्रवृत्तचित्तानाम् ।
कोशीकृतसुकृतानां काशीप्राप्तिर्भवेन्नृणां लोके ॥

यदक्षरं परं ब्रह्म विद्यागम्यमितीरितम् ।
यस्मिन् ज्ञाते भवत् ज्ञातं सर्वं तत् स्वामसंशयम् ॥

ब्रह्मोपनिषद्गर्भोपनिषदाद्या अथर्ववेदस्य बह्व्य उपनिषदस्सन्ति । तासां शारीरके अनुपयोगित्वेन अव्याचिख्यासितत्वात् अदृश्यत्वादिगुणको धर्मोक्तेरित्याद्यधिकरणोपयोगितया मुण्डकस्य व्याचिख्यासितस्य प्रतीकमादत्ते ब्रह्मा देवानामित्याद्याथर्वणोपनिषद्व्याचिख्यासितेति ॥

End:

तत्सर्वं ब्रह्मैव संपद्यत इत्याह यानि चेत्यादिना । एतद्ग्रन्थद्वारकविद्याप्रदाने अयं विधिराथर्वणिकानामिति प्रकृतपरामर्शकादेतच्छब्दादवगम्यते । ग्रन्थद्वारेणैव विद्यायाः प्रकृतत्वसंभवान्न सर्वत्र ब्रह्मविद्याप्रदान इ(मि)ति सूचयन्नाह एतां ब्रह्मविद्यां वदेतेति ।

Colophon:—इति मुण्डकभाष्यटिप्पणमिदं समाप्तम् ॥

No. 723. मुण्डकोपनिषद्भाष्यटिप्पणम्.

MUṆḌAKŌPANIṢADBHĀṢYAṬIPPAṆAM.

Pages, 36. Lines, 6 on a page.

Begins on fol. 67*a* of the MS. described under No. 315.

Complete. Same as the last.

The colophon in this MS. is— इति मुण्डकभाष्यस्य टिप्पणम् ।

चिदानन्दैरिदं काश्यां लिखित्वा प्रेषितं मुदा ।
चोलदेशस्थभिक्षूणामुपकाराय केवलम् ॥
भगवत्पादभाष्यस्य भावगाम्भीर्यवेदिना ।
शिवानन्दयतीशेन टिप्पणं कृतमादरात् ॥

No. 724. मुण्डकोपनिषद्भाष्यम्.

MUṆḌAKŌPANIṢADBHĀṢYAM.

Pages, 14. Lines, 10 on a page.

Complete.

Begins on fol. 24*b* of the MS. described under No. 309. This commentary is by Ānandatīrtha.

Beginning:

आनन्दमजरं नित्यमजमक्षयमच्युतम् ।
अनन्तशक्तिं सर्वज्ञं नमस्ये पुरुषोत्तमम् ॥
मनोर्वैवस्वतस्यादावथर्वा ब्रह्मणोऽजनि ।
मित्रश्च वरुणश्चाथो प्रहेतिर्हेतिरेव च ॥
ब्रह्मणः प्रथमे कल्पे शिवः प्रथमजः स्मृतः ।
सनकाद्यास्तु वाराहे ब्रह्मा विष्णोस्सुतोऽग्रजः ॥
इति ब्रह्माण्डे ॥
ऋगाद्या अपरा विद्या यदा विष्णोर्न वाचकाः ।
ता एव परमा विद्या यदा विष्णोस्तु वाचकाः ॥
इति परमसंहितायाम् ॥

* * * *

वेदैश्च पञ्चरात्रैश्च भक्त्या यज्ञैस्तथैव च ।
दृश्योऽहं नान्यथा दृश्यो वर्षकोटिशतैरपि ॥

इत्यादि वाराहे ॥

अत्रापि तदेतत् सत्यं मन्त्रेषु कर्माणि कवयो यान्यपश्यन्नित्यादिना कर्मविषयामपरविद्यामुक्त्वा येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यामित्यारभ्य आथर्वणानेव मन्त्रान् परविद्यात्वेनाह। चतुर्वेदसंस्कारवतामेवात्र वेदविद्यायामधिकार उक्तः। तेषामेव तां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णमिति

End:

ये त्वेतदेवं जानन्ति ते यान्ति परमं हरिम् । इति च ।
देवानां सन्ततौ जाताः प्रायशो ज्ञानिनः कृते ।
बलवद्धेतुतश्चान्ये यस्माद्ब्रह्मविदस्सुराः ॥

न सन्ततौ ब्रह्मविदो नराणां ज्ञानिनामपि ।
प्रायशस्स्युस्सुराणां च नियमोऽयं कृते युगे ॥
तस्मात् स भगवान् विष्णुः ज्ञेयस्सर्वोत्तमोत्तमः ।
सदा सर्वगुणैः पूर्णो योऽनन्तः पुरुषोत्तमः ॥ इति च ॥
प्रीयतां भगवान् मह्यं प्रेष्ठप्रेष्ठतमस्सदा ।
मम नित्यं नमाम्येनं परमोदारसद्गुणम् ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचितमाथर्वणोपनिषद्भाष्यं समाप्तम् ॥

No. 725. मुण्डकोपनिषद्भाष्यम्.

MUṆḌAKŌPANIṢADBHĀṢYAM.

Pages, 12. Lines, 10 on a page.

Begins on fol. 40*b* of the MS. described under No. 31.

Complete. Same as the last.

No. 726. मुद्गलोपनिषत्.

MUDGALŌPANIṢAD.

Pages, 6. Lines, 21 on a page.

Begins on fol. 267*a* of the MS. described under No. 250.

Complete.

In the way of giving the contents of the Puruṣasūkta, this Upaniṣad teaches that Nārāyaṇa, the Supreme Being, creates the universe out of a fourth part of Himself and becomes Himself the individual soul by placing limitations upon Himself, and that Mōkṣa is the union of the individual soul with the Supreme Being.

Beginning :

वाङ्मे मनसीति शान्तिः ॥ पुरुषसूक्तार्थनिर्णयं व्याख्यास्यामः । पुरुषसंहितायां पुरुषसूक्तार्थस्सङ्ग्रहेण प्रोच्यते । सहस्रशीर्षेत्यत्र सशब्दोऽनन्तवाचकः ।

अनन्तयोजनं प्राह दशाङ्गुलवचस्तथा ।
तस्य प्रथमया विष्णोर्देशतो व्याप्तिरीरिता ॥
द्वितीयया चास्य विष्णोः कालतो व्याप्तिरुच्यते ।
विष्णोर्मोक्षप्रदत्वं च कथितन्तु तृतीयया ॥

End :

पुरुषसूक्तं ध्यायन्नुपसन्नाय शिष्याय दक्षिणकर्णे पुरुषसूक्तार्थमुपादिशेद्विद्वान् स बहुशो वदेद्यातयामो भवति असकृत्कर्णमुपदिशेदेतत्कुर्वाणोऽध्येताध्यापकश्च इह जन्मनि पुरुषो भवतीत्युपनिषत् ॥

Colophon :— मुद्गलोपनिषत्समाप्ता ॥

No. 727. मुद्गलोपनिषत्.

MUDGALŌPANIṢAD.

Pages, 2. Lines, 12 on a page.

Begins on fol. 106*a* of the MS. described under No. 247.

Complete. Same as the last.

No. 728. मैत्रायणीयोपनिषत्.

MAITRĀYAṆĪYŌPANIṢAD.

Pages, 12. Lines, 20 on a page.

Begins on fol. 42*a* of the MS. described under No. 250.

Complete.

After explaining the importance of Vairāgya or selflessness, this Upaniṣad teaches that the illusion of variety in relation

to the visible universe, and the merit and demerit (पुण्य and पाप), accruing from Karma, are removed by the knowledge of truth and by the wisdom imparted by a worthy preceptor; and then it describes certain forms of worship and meditation as the means whereby such knowledge and wisdom may be acquired with ease.

Beginning:

मैत्रायणी कौषीतकी बृहज्जाबालतापनी ।
कालाग्निरुद्रमैत्रेयी सुबालक्षुरिमन्त्रिका ॥

आप्यायन्त्विति शान्तिः । बृहद्रथो वै नाम राजा राज्ये ज्येष्ठं पुत्रं निधापयित्वेदमशाश्वतं मन्यमानः शरीरं वैराग्यमुपेतोऽरण्यं निर्जगाम । स तत्र परमं तप आस्थायादित्यमीक्षमाण ऊर्ध्वबाहुस्तिष्ठति अन्ते सहस्रस्य मुनेरन्तिकमाजगाम । अग्निरिवाधूमकस्तेजसा निर्दहन्निव हात्मवित् भगवान् शाकायन्य उत्तिष्ठोत्तिष्ठ वरं वृणीष्वेति राजानमब्रवीत् । स तस्मै नमस्कृत्योवाच भगवन्नाहमात्मवित्त्वं तत्त्ववित् शृणुमो वयं स त्वन्नो ब्रूहीति । एतद्वृत्तं पुरस्तादशक्यं मा पृच्छ प्रश्नमैक्ष्वाकान्यान् कामान् वृणीष्वेति । शाकायन्यस्य चरणावभिमृशमानो राजेमां गाथां जगाद

End:

विष्णुस्स वा एष एकस्त्रिधा भूतोऽष्टधैकादशधा द्वादशधा परिमित(?) तथा चोद्भूतत्वाद्भूतेषु चरति प्रतिष्ठा सर्वभूतानामधिपतिर्बभूवेत्यसावात्मान्तर्बहिश्चान्तर्बहिश्च ॥

Colophon:

चतुर्थः प्रपाठकः ॥ मैत्रायणीयोपनिषत्समाप्ता ॥

No. 729. मैत्रायणीयोपनिषत्.

MAITRĀYAṆĪYŌPANIṢAD.

Pages, 5. Lines, 12 on a page.

Begins on fol. 13*a* of the MS. described under No. 247.

Complete. Same as the last.

No. 730. मैत्रायणीयोपनिषत्.

MAITRĀYAṆĪYŌPANIṢAD.

Pages, 12. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 285.

Complete. No Sānti is given.

Another copy.

No. 731. मैत्रेयोपनिषत्.

MAITRĒYŌPANISAD.

Pages, 10. Lines, 21 on a page.

Begins on fol. 78*a* of the MS. described under No. 250.

Complete.

Mahādēva herein teaches to Maitrēya that the realization of the identity of the individual soul with the Supreme Being is the highest wisdom, and then describes the experiences of the person who has come to be in possession of such wisdom.

Beginning:

The first Khaṇḍa of this coincides with that of the मैत्रायणीयोपनिषत्, while the other Khaṇḍas are different.

End:

मुक्तिहीनोऽस्मि मुक्तोऽस्मि मोक्षहीनोऽस्म्यहं सदा ।
गन्तव्यदेशहीनोऽस्मि गमनादिविवर्जितः ॥
सर्वदा समरूपोऽस्मि शान्तोऽस्मि पुरुषोत्तम ।
एवं स्वानुभवो यस्य सोऽहमस्मि न संशयः ॥

यः शृणोति सकृद्वापि ब्रह्मैव भवति स्वयम् ।
इत्युपनिषत् ॥

Colophon :— मैत्रेयोपनिषत्समाप्ता ॥

No. 732. मैत्रेयोपनिषत्.

MAITRĒYŌPANIṢAD.

Pages, 5. Lines, 12 on a page.

Begins on fol. 35*b* of the MS. described under No. 247.

Complete. Same as the last.

No. 733. याज्ञवल्क्योपनिषत्.

YĀJÑAVALKYŌPANIṢAD.

Pages, 6. Lines, 20 on a page.

Begins on fol. 160*a* of the MS. described under No. 246.

Complete.

This Upaniṣad describes the characteristics of Sannyāsins, and in illustration thereof it gives the names of certain Sannyāsins known to have been characterized by them; it closes with a statement of the various difficulties that beset the life of the householder (गृहस्थ) and are hence calculated to lead one to adopt the life of renunciation and asceticism in preference.

Beginning :

पूर्णमदः इति शान्तिः ॥ अथ जनको ह वैदेहो याज्ञवल्क्यमुपसमेत्योवाच भगवन् सन्न्यासमनुब्रूहीति । कथं सन्न्यासलक्षणम् । स होवाच याज्ञवल्क्यः ब्रह्मचर्यं समाप्य गृही भवेत् । गृहाद्वनी भूत्वा प्रव्रजेत् । यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् ।

End:

चिदिहास्तीति चिन्मात्रमिदं चिन्मयमेव च ।
चित्त्वं चिदहमेते च लोकाश्चिदिति भावय ॥
यतीनां तदुपादेयं पारहंस्यं परम्पदम् ।
नातः परतराङ्किञ्चिद्विद्यते मुनिपुङ्गव ॥

इत्युपनिषत् ॥

Colophon:—याज्ञवल्क्योपनिषत्समाप्ता ॥

No. 734. याज्ञवल्क्योपनिषत्.

YĀJÑAVALKYŌPANIṢAD.

Pages, 3. Lines, 12 on a page.

Begins on fol. 175*b* of the MS. described under No. 247.

Complete. Same as the last.

No. 735. योगकुण्डल्युपनिषत्.

YŌGAKUṆḌALYUPANIṢAD.

Pages, 19. Lines, 18 on a page.

Begins on fol. 108*b* of the MS. described under No. 246.

Complete.

After laying down that the control of breath leads to the destruction of the impressed tendencies due to the former conditions of the soul's re-incarnation (वासना), this Upaniṣad describes the practice of Yōga and the manner of death which comes to one who has succeeded in it; it concludes with the statement that Yōga leads to the attainment of Mōkṣa even here, through causing the realization of the identity of the individual self with the Supreme Being.

Beginning :

सह नाववत्विति शान्तिः ॥

हेतुद्वयं हि चित्तस्य वासना च समीरणः ।
तयोर्विनष्ट एकस्मिंस्तद्वावपि विनश्यतः ॥
तयोरादौ समीरस्य जयं कुर्यान्नरस्सदा ।
जिताहारश्चासनञ्च शक्तिचालस्तृतीयकः ॥
एतेषां लक्षणं वक्ष्ये शृणु गौतम सादरम् ।
सुस्निग्धमधुराहारश्चतुर्थांशविवर्जितः ॥
भुज्यते शिवसंप्रीत्यै मिताहारस्स उच्यते ।

End :

घटस्थदीपवच्छश्वदन्तरेव प्रकाशते ॥
ध्यायन्नास्ते मुनिश्चैव आसुप्तेरामृतेस्तु यः ।
जीवन्मुक्तस्स विज्ञेयस्स धन्यः कृतकृत्यवान् ॥
जीवन्मुक्तपदन्त्यक्त्वा स्वदेहे कालसात्कृते ।
विशत्यदेहमुक्तत्वं पवनो मन्दतामिव ॥
अगन्धमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं तदेव शिष्यत्यमलन्निरामयम् ॥

इत्युपनिषत् ॥

Colophon :— योगकुण्डल्युपनिषत्समाप्ता ॥

No. 736. योगकुण्डल्युपनिषत्.

YŌGAKUṆḌALYUPANIṢAD.

Pages, 7. Lines, 12 on a page.

Begins on fol. 155*b* of the MS. described under No. 247.

Complete. Same as the last.

No. 737. योगचूडामण्युपनिषत्.

YŌGACŪḌĀMAṆYUPANIṢAḌ.

Pages, 15. Lines, 22 on a page.

Begins on fol. 193*a* of the MS. described under No. 250.

Complete.

The practice of Yōga is herein explained; and the two Mantras, Haṁsa and Praṇava, are herein declared to be helpful in enabling one to succeed in the practice of Yōga.

Beginning:

ओम् आप्यायन्त्विति शान्तिः ॥

योगचूडामणिं वक्ष्ये योगिनां हितकाम्यया ।
कैवल्यसिद्धिदङ्गूढं सेवितं योगवित्तमैः ॥
आसनम्प्राणसंरोधः प्रत्याहारश्च धारणा ।
ध्यानं समाधिरेतानि योगाङ्गानि भवन्ति षट् ॥

End:

चरताञ्चक्षुरादीनां विषयेषु यथाक्रमम् ।
तत्प्रत्याहरणन्तेषां प्रत्याहारस्स उच्यते ॥
यथा तृतीयकाले तु रविः प्रत्याहरेत्प्रभाम् ।
तृतीयाङ्गस्थितो योगी विकारं मानसं बहिः ॥
ओमित्युपनिषत् ॥

Colophon:— योगचूडामण्युपनिषत्समाप्ता ॥

No. 738. योगचूडामण्युपनिषत्.

YŌGACŪḌĀMAṆYUPANIṢAD.

Pages, 6. Lines, 12 on a page.

Begins on fol. 78*b* of the MS. described under No 247.

Complete. Same as the last.

No. 739. योगचूडामण्युपनिषत्.

YŌGACŪḌĀMAṆYUPANIṢAD.

Pages, 17. Lines, 12 on a page.

Begins on fol. 40*b* of the MS. described under No. 180.

Complete. Same as the last.

No. 740. योगतत्त्वोपनिषत्.

YŌGATATTVŌPANIṢAD.

Pages, 15. Lines, 20 on a page.

Begins on fol. 146*b* of the MS. described under No. 250.

Complete.

The practice of Yōga is herein explained, and it is taught that it will lead the adept to the attainment of the highest wisdom in the form of self-realization.

Beginning:

सह नाववत्विति शान्तिः ।

योगतत्त्वं प्रवक्ष्यामि योगिनां हितकाम्यया ।
यच्छ्रुत्वा च पठित्वा च सर्वपापैः प्रमुच्यते ॥
विष्णुर्नाम महायोगी महाभूतो महातपाः ।
तत्त्वमार्गे यथा दीपः दृश्यते पुरुषोत्तमः ॥
तमाराध्य जगन्नाथं प्रणिपत्य पितामहः ।
पप्रच्छ योगतत्त्वं मे ब्रूहि चाष्टाङ्गसंयुतम् ॥
तमुवाच हृषीकेशः वक्ष्यामि शृणु तत्त्वतः ।

End:

एवं द्वारेषु सर्वेषु वायुपूरितरेचितः ।
निषिद्धन्तु नवद्वारे ऊर्द्ध्वं प्राङ्निश्वासस्तदा ॥
घटमध्ये यथा दीपं निवातं कुम्भकं विदुः ।

निषिद्धैर्नवभिर्द्वारैः निर्जने निरुपद्रवे ॥
निश्चितन्त्वात्मभूतानामनिष्टं योगसेवया ॥ इत्युपनिषत् ॥

Colophon :—योगतत्त्वोपनिषत्समाप्ता ॥

No. **741**. योगतत्त्वोपनिषत्.
YŌGATATTVŌPANIṢAD.

Pages, 6. Lines, 12 on a page.

Begins on fol. 61*b* of the MS. described under No. 247.

Complete. Same as the last.

No. **742**. योगतत्त्वोपनिषत्.
YŌGATATTVŌPANIṢAD.

Page, 1. Lines, 7 on a page.

Begins on fol. 19*b* of the MS. described under No. 673.

Complete.

After the first two Ślōkas, this codex differs from the copy described under No. 740. The third verse herein is the 24th verse from the last in that codex.

No. **743**. योगतत्त्वोपनिषत्.
YŌGATATTVŌPANIṢAD.

Pages, 2. Lines, 6 on a page.

Begins on fol. 18*a* of the MS. described under No. 284.

Complete.

Another copy like the preceding.

No. **744**. योगतत्त्वोपनिषत्.
YŌGATATTVŌPANIṢAD.

Pages, 3. Lines, 5 on a page.

Begins on fol. 87*a* of the MS. described under No. 217.

Complete.

Another copy like the preceding.

No. 745. योगतत्त्वोपनिषत्.

YŌGATATTVŌPANIṢAD.

Substance, palm-leaf. Size, $9\frac{4}{8} \times 1\frac{1}{4}$ inches. Pages, 2. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 168*b*. The other works herein are: Navākṣarī-mantraḥ 1*a*, Pañcamīstavarājaḥ 7*a*, Śrīcakravidhiḥ 17*a*, Dēvīpūjā-vidhānam 26*a*, Mahāvākyapañcīkaraṇam 163*a*, Bhāṣyakārāṣṭa-kam 166*a*, Haṁsōpaniṣad 167*b*, Nāmapārāyaṇam 170*a*, Vāmapūjā-vidhānam 176*a*.

Complete. Same as the last.

No. 746. योगशिखोपनिषत्.

YŌGAŚIKHŌPANIṢAD.

Pages, 40. Lines, 21 on a page.

Begins on fol. 2*a* of the MS. described under No. 246.

Complete.

It is herein explained that it is only when the knowledge of the highest wisdom is possessed along with the power to practise Yōga well, that selfishness and all other evil tendencies which stand in the way of man's realizing the true nature of the soul are really destroyed. The practice of Yōga and certain forms of worship and meditation are also accordingly described herein.

Beginning:

ओं सह नाववत्विति शान्तिः ।

सर्वे जीवास्सुखैर्दुःखैर्मायाजालेन मोहिताः ।
तेषां मुक्तिः कथं देव कृपया वद शङ्कर ॥

सर्वसिद्धिकरं मार्गं मायाजालनिकृन्तनम् ।
जन्ममृत्युजराव्याधिनाशनं सुखदं वद ॥ इति
हिरण्यगर्भः पप्रच्छ स होवाच महेश्वरः ।
नानामार्गैस्तु दुष्प्रापं कैवल्यं परमं पदम् ॥
सिद्धिमार्गेण लभते नान्यथा पद्मसंभव ।
पतिताश्शास्त्रजालेषु प्रज्ञया तेन मोहिताः ॥
स्वात्मप्रकाशे रूपं तत् किं शास्त्रेण प्रकाश्यते ।
निष्कलं निर्मलं शान्तं सर्वातीतं निरामयम् ॥
तदेव जीवरूपेण पुण्यपापफलैर्वृतम् ।

End:

यथाग्निर्दारुमध्यस्थो नोत्तिष्ठेन्मथनं विना ।
विना वाभ्यासयोगेन ज्ञानदीपस्तथा न हि ॥
घटमध्ये यथा दीपो बाह्ये नैव प्रकाशते ।
भिन्ने तस्मिन् घटे चैव दीपज्वाला च भासते ॥
स्वकायं घटमित्युक्तं यथा जीवो हि तत्पदम् ।
गुरुवाक्यसमाभिन्ने ब्रह्मज्ञानं प्रकाशते ॥
कर्णधारं गुरुं प्राप्य तद्वाक्यं प्लववद्दृढम् ।
अभ्यासवासनाशक्त्या तरन्ति भवसागरम् ॥

इत्युपनिषत् ॥

Colophon :—योगशिखोपनिषत् समाप्ता ॥

No. **747.** योगशिखोपनिषत्.

YŌGAŚIKHŌPANIṢAD.

Pages, 12. Lines, 12 on a page.

Begins on fol. 123*b* of the MS. described under No. 247.

Complete. Same as the last.

No. 748. योगशिखोपनिषत्.
YŌGAŚIKHŌPANIṢAD.

Page, 1. Lines, 7 on a page.

Begins on fol. 59*a* of the MS. described under No. 255.

Complete.

This version of the Upaniṣad is different from the last.

Beginning:

अथ योगशिखां प्रवक्ष्यामि सर्वज्ञानेषु चोत्तमम् ।
यदा तु ध्यायते मन्त्रं गात्रकम्पोऽथ जायते ॥
आसनं पद्मकं बध्द्वा यच्चान्यदपि रोचते ।
नासिकाग्रे दृष्टिं कुर्यात् हस्तौ पादौ च संयुतौ ॥
मनस्सर्वत्र संगृह्य ओङ्कारं तत्र चिन्तयेत् ।

End:

पुण्यमेतत् समासाद्य संप्राप्य कथितं मया ।
लब्ध्वा योगोऽथ बुध्येत प्रसन्नं परमेष्ठिनम् ॥
जन्मान्तरसहस्रेषु यदा क्षीणं तु किल्बिषम् ।
तदा पश्यति योगेन संसारच्छेदनं महत् ॥

Colophon:—इति योगाशिखोपनिषत्समाप्ता ॥

No. 749. रहस्योपनिषत्.
RAHASYŌPANIṢAD.

Pages, 9. Lines, 20 on a page.

Begins on fol. 100*b* of the MS. described under No. 250.

Complete.

Śiva teaches to Śuka the four Mahāvākyas—(1) प्रज्ञानं ब्रह्म (2) अहं ब्रह्मास्मि (3) तत्त्वमसि (4) अयमात्मा ब्रह्म — taken from certain Upaniṣads belonging respectively to the four Vēdas, together with the Ṣaḍaṅgas required for their Japa or silent meditative repetition, and the Upaniṣad concludes by saying that Śuka became a Jīvan-mukta as the result of the teachings so received at the hands of Śiva.

Beginning:

सह नाववत्विति शान्तिः । अथातो रहस्योपनिषदं व्याख्यास्यामः । देवर्षयो ब्रह्माणं सम्पूज्य प्रणिपत्य पप्रच्छुर्भगवन्नस्माकं रहस्योपनिषदं ब्रूहीति । सोऽब्रवीत् ।

पुरा व्यासो महातेजास्सर्ववेदतपोनिधिः ।
प्रणिपत्य शिवं साम्बं कृताञ्जलिरुवाच ह ॥

श्रीवेदव्यास उवाच

देवदेव महाप्राज्ञ पाशछेददृढव्रत ।
शुकस्य मम पुत्रस्य वेदसंस्कारकर्मणि ॥
ब्रह्मोपदेशकालोऽयमिदानीं समुपस्थितः ।
ब्रह्मोपदेशः कर्तव्यो भवताद्य जगद्गुरो ॥

End:

प्रव्रजन्तन्तमालोक्य कृष्णद्वैपायनो मुनिः ।
अनुव्रजन्नाजुहाव पुत्रविश्लेषकातरः ॥
प्रतिनेदुस्तथा सर्वे जगत्स्थावरजङ्गमम् ।
तच्छ्रुत्वा सकलाकारो व्यासस्सत्यवतीसुतः ॥
पुत्रेण सहितः प्रीत्या परानन्दमुपेयिवान् ।
यो रहस्योपनिषदमधीते गुर्वनुग्रहात् ।
सर्वपापविनिर्मुक्तस्साक्षात्कैवल्यमश्नुते ॥
साक्षात्कैवल्यमश्नुत इत्युपनिषत् ॥

Colophon:—रहस्योपनिषत्समाप्ता ॥

No. 750. रहस्योपनिषत्.

RAHASYOPANIṢAD.

Pages, 4. Lines, 12 on a page.

Begins on fol. 44*b* of the MS. described under No. 247.

Complete. Same as the last.

No. 751. रहस्योपनिषत्.

RAHASYŌPANIṢAD.

Pages, 7. Lines, 6 on a page.

Begins on fol. 7*a* of the MS. described under No. 284.

Complete.

Another copy of the preceding. A verse is given in the beginning of this codex, which is not found in the previous copy.

परमाद्वैतसत्यात्मप्रज्ञानाद्वैतचिद्घनम् ।
आश्रये दक्षिणामूर्तिमवाङ्मनसगोचरम् ॥

No. 752. रहस्योपनिषत्.

RAHASYŌPANIṢAD.

Pages, 6. Lines, 7 on a page.

Begins on fol. 81*a* of the MS. described under No. 256.

Complete. Same as the last.

No. 753. रामतापिन्युपनिषत्.

RĀMATĀPINYUPANIṢAD.

Pages, 20. Lines, 22 on a page.

Begins on fol. 254*a* of the MS. described under No. 250.

Complete.

In the Pūrvatāpinī or the first part, it is taught that Rāma is the Supreme Being, a Mantra and a Yantra are both described for conducting his worship, and the story of the Rāmāyaṇa is also briefly given. In the Uttaratāpinī or the second part, the component parts of the Praṇava are identified with Rāma and his brothers, while Sīta is identified with Prakṛti or primordial matter; and the identification of the individual soul with Rāma is then taught to constitute the goal of salvation; and lastly Śiva is authorized by Rāma to teach at Benares the Tāraka-Mantra relating unto himself.

Beginning of Pūrvatāpinī :

ओं भद्रङ्कर्णेभिरिति शान्तिः ॥

चिन्मयेऽस्मिन्महाविष्णौ जाते दाशरथे हरौ ।
रघोः कुलेऽखिलं राति राजते यो महीस्थितः ॥
स राम इति लोकेषु विद्वद्भिः प्रकटीकृतः ।
राक्षसा येन मरणं यान्ति सोद्रेकतोऽथ वा ॥
रामनाम भुवि ख्यातमभिरामेण वा पुनः ।
राक्षसा मर्त्यरूपेण राहुर्मनसिजं यथा ॥

* * * *

रमन्ते योगिनोऽनन्ते नित्यानन्दचिदात्मनि ।
इति रामपदेनासौ परं ब्रह्माभिधीयतें ॥

End :

विश्वव्यापी राघवो यस्तदानीमन्तर्दधे शङ्खं चक्रं गदाब्जे ।
धृत्वा रमारहितस्सानुजश्च सपत्तनस्सानुजस्सर्वलोकी ॥
तद्भक्ता ये लब्धकामाश्च भुक्त्वा तथा पदं परमं यान्ति ते च ।
इमा ऋचस्सर्वकामार्थदाश्च ये ते पठन्त्यमला यान्ति मोक्षम् ॥

चिन्मयेऽस्मिन् त्रयोदश । स्वभूज्योतिस्तिस्रः । सीतारामावेका । जीववाचि षट्षष्टिः । भूतादेकादश । पञ्चखण्डेषु त्रिणवतिः ॥

Beginning of Uttaratāpinī :

ओं बृहस्पतिरुवाच याज्ञवल्क्यं यदनुकूल(कुरु) क्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदन(म)विमुक्तं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषाम्भूतानां ब्रह्मसदनं तस्माद्यत्र क्वचन गच्छति ॥

End :

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधिविश्वे निषेदुः । यस्तन्न वेद किमृचा करिष्यति । य इत्तद्विदुस्त इमे समासते । तद्विष्णोः

परमम्पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते । विष्णोर्यत्परमं पदम् ॥ ओं सत्यमित्युपनिषत् ॥

Colophon:—श्रीरामोत्तरतापिन्युपनिषत्समाप्ता ॥

No. 754. रामतापिन्युपनिषत्.

RĀMATĀPINYUPANIṢAD.

Pages, 8. Lines, 12 on a page.

Begins on fol. 101*b* of the MS. described under No. 247.

Complete. Same as the last.

No. 755. रामतापिन्युपनिषत्.

RĀMATĀPINYUPANIṢAD.

Pages, 24. Lines, 5 on a page.

Begins on fol. 6*a* of the MS. described under No. 139.

Complete.

The Upaniṣad seems to have had its beginning on a leaf which is lost; and a leaf numbered as 4 gives the colophon of the first part of the Upaniṣad as follows:—

इत्यथर्वणरहस्ये श्रीरामपूर्वतापनीये प्रथमोपनिषत् ।

The work is otherwise complete and gives the Śānti as—

सह नाववतु.

In the Uttaratāpinī, the colophons of the first and the third Khaṇḍas give the subject-matter as follows:—

I. तारकस्वरूपनिरूपणम् ।

III. उपदेशक्रमः ।

The Uttaratāpinī, according to the MS. described under No. 753, contains six Khaṇḍas; but this codex, while containing

the whole, counts only five Khaṇḍas by including both the first and the second under the first Khaṇḍa.

No. 756. रामतापिन्युपनिषत्.

RĀMATĀPINYUPANIṢAD.

Pages, 8. Lines, 10 on a page.

Begins on fol. 53*a* of the MS. described under No. 560.

Complete.

This MS. like the preceding, counts only five Khaṇḍas in the Uttaratāpinī. It contains the following Śānti and also certain verses at the beginning which are not found in the MS. described under No. 753.

शन्नो मित्रः शं वरुण इति शान्तिः ।

नमो ब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यः । सर्वोपप्लवरहितः प्रज्ञानघनः प्रत्यगर्थो ब्रह्मैवाहमस्मि । ओं तत्सत् ॥

अखण्डसच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥

The **Colophon** is :—

इत्यथर्वणरहस्ये शौनकसंहितायां रामोत्तरतापनीयोपनिषदि पञ्चमखण्डः ॥ . . . सह नाववतु . . . शान्तिः ।

No. 757. रामतापिन्युपनिषत्.

RĀMATĀPINYUPANIṢAD.

Substance, palm-leaf. Size, 16 × 1¾ inches. Pages, 27. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 38*a*. The other works herein are Rāmamānasapūjāvidhiḥ 1*a*, Rāmakavacaḥ 5*a*, Rāmastavarājaḥ 7*a*, Rāmāṣṭōttaraśatanāmastōtram 11*a*, Rāmānusmṛtiḥ 13*a*, Dēvarṣipitṛtarpaṇaprayōgaḥ 14*a*, Nārāyaṇatīrthastavaḥ 14*b*, Rāmadurgam

15*a*, Rāmamantrakavacaḥ 16*a*, Rāmamālāmantram 17*b*, Rāmakīlakam 18*a*, Viṣṇusahasranāmastōtram 19*a*, Viṣṇusahasranāmāvaliḥ 27*a*, Trailōkyamōhanakavacaḥ 36*a*, Tattvaviṣayakagranthaḥ 58*a*, Viṣṇustōtram 59*a*, Tulasīstōtram 60*a*, Gaṅgāṣṭakam 62*a*, Lakṣmīstutiḥ 63*a*, Kaupīnapañcakam 64*a*, Vyāsāṣṭakam 65*a*, Gāruḍōpaniṣad 66*a*, Trivēṇīdaśakam 68*a*, Viṣṇunāmasaṅkīrtanam 69*a*, Kaupīnapañcakam 69*b*, Manīṣāpañcakam 70*a*, Siddhārikōṣṭaprakaraṇam 71*a*, Brahmapārastōtram 72*a*, Mānasikasnānavidhiḥ 72*b*, Rāmakavacapañjaram 74*a*, Rāmabrahmastutiḥ 77*a*, Annapūrṇōśvaryaṣṭakam 79*a*.

Complete.

On fol. 52*a* begins another copy of Uttaratāpinī extending over 8 pages.

The Śānti given is भद्रं कर्णेभिः ।

No. 758. रामतापिन्युपनिषत्.

RĀMATĀPINYUPANIṢAD.

Substance, palm-leaf. Size, 17¼ × 1⅜ inches. Pages, 15. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Rāmatāpinyupaniṣadvyākhyā, 8*b*.

Complete.

This MS. counts six Khaṇḍas in the Uttaratāpinī. At the end the following verse is added :—

मुक्ताभरणसप्तम्यां पिङ्गलाब्दे रवौ(वेः) दिने ।
पूर्वापरौ तापनीयावलिखद्रामगोचरौ ॥

No. 759. रामतापिन्युपनिषत्.

RĀMATĀPINYUPANIṢAD.

Substance, palm-leaf. Size, 8¼ × 1¼ inches. Pages, 26. Lines, 4 on a page. Character, Kanarese. Condition, very much injured.

This copy is very imperfect.

Uttaratāpinī ; complete.

No. 760. रामतापिन्युपनिषत्.

RĀMATĀPINYUPANIṢAD.

Pages, 10. Lines, 7 on a page.

Begins on fol. 35*b* of the MS. described under No. 306.

This MS. counts six Khaṇḍas.

Uttaratāpinī; complete.

No. 761. रामतापिन्युपनिषत्.

RĀMATĀPINYUPANIṢAD.

Pages, 20. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 307.

Complete. Same as the last.

No. 762. रामतापिन्युपनिषद्व्याख्या.

RĀMATĀPINYUPANIṢADVYĀKHYĀ.

Pages, 54. Lines, 11 on a page.

Begins on fol. 24*a* of the MS. described under No. 560.

Complete.

The commentary on the first part is by Viśvēśvara, and that on the second, named Sudhā, by Bhaṭṭa Mudgalasūri.

Beginning of Pūrvatāpinī:

ओं नमो भगवते रामचन्द्राय । मातृसहस्रदयावती श्रीरामतापनयोपनिषत् मध्यमोत्तमाधिकारितारतम्यात्सगुणनिर्गुणोपासनप्रकारपूर्वोत्तरभागाभ्यां प्रवर्तते । तत्र मन्दाधिकारिसगुणोपासनयैव निर्गुणस्योपादेयत्वात् पञ्चभिः श्लोकैरादौ रामनाम्नो निरुक्तिं सगुणपरतया कृत्वा षष्ठश्लोकेन निर्गुणपरतया निरुक्तिमाह चिन्मय इत्यादिना । अत्रायमन्वयः रघोः कुले दशरथे विषये चिन्मयेऽस्मिन् महाविष्णौ हरौ जाते सति

वैशेषिकादिमतं निराकृतम् । अस्मिन् प्रत्यक्ष इत्यर्थः । अयमहमस्मीति पामराणामप्यनुभवात् । वेवेष्टीति विष्णुः विष्णौ विष्लृव्याप्तावित्यस्माद्धातोः नुप्रत्ययान्तस्य रूपं सर्वमूर्तसंयोगित्वं व्यापकत्वं गगनादावपीति तद्व्यावृत्त्यर्थं महाविष्णावित्युक्तम् । तथा च परिच्छेदत्रयशून्यत्वं महाविष्णुशब्दार्थः । आत्मा न देशतः परिच्छिन्नः सर्वत्र सत्वात् न कालतः परिच्छिन्नः सर्वदैव सत्वात् न वस्तुतः परिच्छिन्नः तद्व्यतिरेकेण वस्त्वन्तरस्याभावात्. . .

Colophon:

इति श्रीमद्विश्वेश्वरविरचितायां रामपूर्वतापनीटीकायां पञ्चमोपनिषत् समाप्ता ॥

ओं शन्नो मित्रश्शं वरुणः । शन्नो भवत्वर्यमा । ओं शान्तिश्शान्तिश्शान्तिः ॥

निर्गुणाप्तिकरीत्यादौ सगुणोपास्तिरीरिता ।
तस्याश्च मन्त्रसाध्यत्वाद्विहितस्तज्जपः पुरा ॥
मन्त्रार्थं तु द्वितीयस्यां तृतीयोपनिषद्यपि ।
तुर्यायां कथितं मन्त्रं पञ्चम्यां तु प्रपूजनम् ॥
तद्व्याख्यानान्मया रामः पूजितः प्रीयतां सदा ॥

Beginning of Uttaratāpinī:

रामोत्तरतापिनीयव्याख्यानम् ।

अन्तर्यामिणमात्मानममृतं ब्रह्म निर्मलम् ।
यत्साक्षादपरोक्षाच्च तं श्रीरामं भजेऽञ्जसा ॥

बृहस्पतिरुवाच याज्ञवल्क्यमित्याद्याथर्वणरहस्यस्था श्रीरामतापनीयोपनिषत् तस्या इयमल्पाक्षरव्याख्या प्रस्तूयते ॥ . . .

End:

श्रीरामचन्द्रेणोक्तमिति अत एव तत्क्षेत्रोपासनेन तवावश्यमात्मज्ञानं भविष्यतीति यदुक्तं मया तत्र विश्वासः कार्यः इति भावः । इदानीमत्रेः क्षेत्रोपासनार्थं प्रवृत्तये क्षेत्रं स्तौति यो विमुक्त इति एतत्क्षेत्रदर्शनेनापि

यदा जन्मान्तरिता इति जन्मभिरन्तरिताः अनेकजन्मकृता दोषा न स्पृशन्ति तदा किं वक्तव्यमुपासनायां कृतायामिति इतिशब्दो ब्रह्मज्ञानोपदेशसमाप्तौ ॥

यद्व्याख्यातं मया किं चित् स्वीयबोधानुसारतः ।
तत् क्षन्तव्यं बुधैश्शुद्धैः एष बद्धोऽञ्जलिर्मया ॥

Colophon:

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणविद्वद्धौरेयश्रीरामचरणसरोजचञ्चरीकहृदयश्रीमद्भगवद्भट्टमुद्गलसूरिविरचितायां सुधाख्यायां चतुर्थखण्डिका समाप्ता ॥

The 5th Khaṇḍikā is incomplete.

No. 763. रामतापिन्युपनिषद्व्याख्या.
RĀMATĀPINYUPANIṢADVYĀKHYĀ.

Pages, 45. Lines, 8 on a page.

Begins on fol. 8*b* of the MS. described under No. 758.

Incomplete.

By Nāgēśvarasūri, a descendant of Timmarāja of Sāraṅga family.

Beginning of Pūrvatāpinī:

प्रणमदमरमौलिप्रोतमाणिक्यराश्मि-
च्छुरितनखदलाग्रं पादपद्मं मुरारेः ।
मनसि निविशमानं मामकं तापजालं
शमयतु वितरत्वामोदमश्रान्तमन्तः ॥

सं रामं राममारामममसङ्ख्यगुणशालिनम् ।
क्लेशकर्मविपाकादेर्विरामममिराधये ॥
योगिध्येयमनन्तमष्टगुणितां भूतिं व्यतीत्यास्थितं
सान्द्रानन्दमुपाश्रितेह परमं विष्णोः पदं सर्वगम् ।

संसारार्ककरप्रतप्तमनसां श्वश्श्रेयसं तन्वती
श्रीरामोपनिषच्चिराय जयताच्छाखेव काल्पद्रुमी ॥
अस्ति स्वस्त्ययनीयशीलसुभगस्सौजन्यधन्यस्सुधीः
सारङ्गान्वयवार्धिशीताकिरणः श्रीतिम्मराजान्वयः ।
तन्वानेन वियन्नदीविजयिनीं दानाम्बुधारापगां
श्रीरामाङ्घ्रिसरोजभृङ्गमनसा तेनाहमध्येषितः ॥
पदवाक्यप्रमाणाब्धिमन्थानमतिमन्दरः ।
रामोपनिषदो वृत्तिं कुर्वे नागेश्वरः कृती ॥
श्रीरामोपनिषत्सेयं यथामति यथाश्रुतम् ।
व्याख्यायते मुमुक्षूणां रामात्ममतिजन्मने ॥

इह हि मुमुक्षवोऽधिकारिणो मोक्षः प्रयोजनं रामात्मावगतिरवान्तर-प्रयोजनं सम्बन्धः पुनर्मोक्षावगतिभ्यां सहोपनिषदः कार्यकारणभावः ।

* * * *

चिन्मये चिद्रूपे प्रयोगे प्राचुर्यात् स्वार्थे . . . गत्वा गतविकारावयवेषु(?) प्रकृते मयडुच्यते अद्वितीयचिदात्मकस्य रामस्य विष्णोश्चितो विश्लेषा-संभवात् । अजो नित्यः शाश्वतोऽयं पुराण इत्यादिश्रुतिभिस्तस्योत्पत्तिनिरासात् निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनमिति श्रुत्या निरवयवतो-क्तेश्च ॥

Colophon:

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणमहोपाध्यायनागदेवसूरिविरचि-तायां श्रीरामोपनिषद्वृत्तौ पूर्वतापिनीयं समाप्तम् ।

Beginning of Uttaratāpinī:

रामब्रह्मात्मविद्यायां प्रागारादुपकारकः ।
अव्यधाय्यधुना हेतुरुच्यते सामवायिकः ॥
उच्छासादोत्तमात् काशीवासः प्रथमखण्डके ।
अध्यात्मकाविमुक्तस्थचिन्तनं तु तृतीयके ॥

अतो न पुनरुक्तिः तत्र बृहस्पतियाज्ञवल्क्यसंवादाख्यायिकामुखेन ब्रह्मविद्यायां सामवायिकं प्रथमं हेतुमाह बृहस्पतिरुवाचेत्यादिना। बृहस्पतिर्देवगुरुर्याज्ञवल्क्यमनेकान् ब्रह्मवादिनो जितवन्तमिति गम्यते

End :

यन्निष्ठा यन्निरूपिता व्याप्तिर्येन विशेषणेन विना गृहीतुं न शक्यते तस्यैव सार्थकत्वात्

No. 764. रामतापिन्युपनिषद्व्याख्या (पदयोजिका).

RĀMATĀPINYUPANIṢADVYĀKHYĀ (PADAYŌJIKĀ).

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 26. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

The author of this commentary is Rāmayati, pupil of Gōvindānanda.

Begins on fol. 1*a*. The other works herein are—Śivanāmāvaliḥ 14*a*, Śivakavacaḥ 16*a*, Āsanamantraḥ 22*a*, Vibhūtisnānamantraḥ 22*a*, Ṣaṭsthalanirṇayaḥ 23*a*, Liṅgadhāraṇalakṣaṇam 23*b*, Pādatīrthamāhātmyam 24*a*, Prātaḥkālasmaraṇīyapañcaratnam, 24*a*, Mātṛkāśivagāthā 24*b*, Mallikēśvaragadyam 25*a*, Ṣaḍvarṇamantrāṣṭakam 35*b*, Nigrahāṣṭakam 26*a*, Aparādhastavaḥ 26*b*, Agastyāṣṭakam 27*a*, Pañcākṣaryaṣṭakam 27*b*, Śivāṣṭakam 28*a*, Namaśśivāyāṣṭakam 29*a*, Vināyakāṣṭakam 29*a*, Śivaśaṅkarāṣṭakam 30*a*, Nṛsimhamālāmantraḥ 31*a*, Malhaṇastavaḥ 32*a*, Vṛṣabhakavacaḥ 36*a*, Indrākṣīstōtram 38*a*, Nigamāgamatriśatīnāmāvaliḥ 42*a*, Namōntāṣṭāvimśatyuttaraśatanāmāvaliḥ 50*a*, Liṅgayōgyaṣṭakam 55*a*, Āndhramantrāḥ 56*a*, Pañcāṅgam 57*a*.

Beginning of Pūrvatāpinī :

श्रीरामोपनिषद्वृत्तिं विधास्ये रामकाशिकाम् ।
रामभक्त्या प्रयुक्तोऽहमानन्दोत्पन्नसंज्ञिकः ॥

इह खलु सुखदुःखलाभालाभयोरनन्तरस्य पुरुषार्थत्वात् निखिलाधारसंसाराटवीपर्यटनपरिश्रान्तानामुभयविधसाध्यसुलभात्मकरुणया ब्रह्मविद्या-

मुपजनयितुमथर्वणशौनकशाखायां चिन्मयेत्याद्या स देवं पश्यति सोऽमृतत्वं गच्छतीत्यन्तं रामोपनिषत् पूर्वोत्तरसगुणनिर्गुणोपासनाभेदेन अधिकारितारतम्यात् प्रवृत्ता। तत्र चिन्मयेऽस्मिन्नित्यादिभिः षड्भिः श्लोकैः रामनाम निर्वक्ति ॥

End:

चिन्मय इत्यवाद्या ऋचो मुमुक्षूणामवश्यं पठनीया इत्याह इमा इति। येपठन्ति त इत्यर्थः ये जनाः।

Colophon:

इति पञ्चमोपनिषत् समाप्ता ॥ इति श्रीपरमहंसपरिव्राजकाचार्यश्रीगोविन्दानन्दसरस्वतीयतिभगवत्पूज्यपादशिष्यश्रीरामनामयतिविरचितायां रामोपनिषत्पदयोजनायां पूर्वतापिनीयं समाप्तम् ॥

विकृतीवत्सरे चैव श्रावण्यां शुक्लपक्षयोः।
तृतीयां भृगुवारे च घट्टरायप्पलिख्यते ॥
पूर्वतापिनीव्याख्येयं रामचन्द्रप्रसादतः।
गणनाथसरस्वत्यां घट्टरायप्पलिख्यते ॥

Beginning of Uttaratāpinī :—

एवं चिन्मय इत्यादिपञ्चोपनिषद्भिः मन्दाधिकारिणां सगुणोपासनं प्रपञ्चितम्। तेन शुद्धसत्त्वानां सांसारिकफलविरक्तानां त्यक्तसकलकर्मणां मुमुक्षूणां कृते निर्गुणब्रह्मप्रधानोत्तरतापनीयोपनिषदधुना प्रस्तूयते। बृहस्पतिरुवाच याज्ञवल्क्यं जनकसभायामासीनं यत् प्रसिद्धमनु पश्चात् सर्वोत्कृष्टमिति यावत् कुरुक्षेत्रं येन दुःखितस्सन् करोतीति तत्कुरु पापं कर्म तत्क्षेपणात् त्रायत आत्मानमिति कुरुक्षेत्रम्।

End:

एष सर्वज्ञः अविद्यानिवृत्त्या सर्वज्ञानातीति एषोऽन्तर्यामी सर्वेषामन्तर्नीयते। तत्र हेतुः एष योनिः कारणं सर्वस्य जगतः

No. 765. रामतापिन्युपनिषद्व्याख्या (पदयोजनिका.)

RĀMATĀPINYUPANIṢADVYĀKHYĀ (PADAYŌJANIKĀ.)

Substance, palm-leaf. Size, 15¼ × 1 inches. Pages, 61. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new. Complete. Same as the last.

Beginning:

श्रीरामतापिनीयेऽस्मिन् अज्ञातार्थपदाश्रया ।
व्याख्या प्रक्रियतेऽत्यल्पा कल्पनातीतसिद्धये ॥

चिन्मय इत्याद्या देवं स्तौति स देवं पश्यति सोऽमृतत्वङ्गच्छतीत्यन्ता आथर्वणी शौनकशाखायां रामोपनिषत् । तस्या इयम् अल्पग्रन्था पदवृत्तिरारभ्यते । ओं चिन्मय इत्यादिभिः षड्भिः श्लोकमन्त्रैः श्रीरामनाम निर्वक्ति।

End:

तेषामेवानुकम्पार्थमित्याद्या स्मृतिरपि समुच्चीयते ।
तस्मात्सर्वात्मना रामं भजेऽहं करुणाकरम् ।
सदा रामोऽहमस्मीति दृढबोधप्रसिद्धये ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दसरस्वतीभगवत्पूज्यपादशिष्यश्रीरामयतिप्रकाशितायां श्रीरामोपनिषत्पदयोजनिकायामथर्वणरहस्ये उत्तरतापिनीयं समाप्तम् ॥

No. 766. रामरहस्योपनिषत्.

RĀMARAHASYŌPANIṢAD.

Pages, 20. Lines, 21 on a page.

Begins on fol. 245*a* of the MS. described under No. 250.

Complete.

Hanūmat teaches in this Upaniṣad that Rāma is the Supreme Being, that other deities like Gaṇapati, &c., are merely his limbs,

that the meaning of the Rāma-Mantra is identical with that of the Mahāvākyas found in the Upaniṣads, and that the repetition of the Rāma-Mantra is calculated to lead one to salvation. More than one Rāma-Mantra is mentioned herein to allow room for choice on the part of the devotee.

Beginning:

ओं भद्रङ्कर्णेभिरिति शान्तिः ॥

रहस्यं रामतपनं वासुदेवञ्च मुद्गलम् ।
शाण्डिल्यं पैङ्गलं भिक्षु महच्छारीरकं शिखा ॥
सनकाद्या योगिवर्या अन्ये च ऋषयस्तथा ।
प्रह्लादाद्या विष्णुभक्ता हनूमन्तमथाब्रुवन् ॥
वायुपुत्र महाबाहो किन्तत्त्वं ब्रह्मवादिनाम् ।
पुराणेषूष्टादशसु स्मृतिषूष्टादशस्वपि ॥
चतुर्वेदेषु शास्त्रेषु विद्यास्वाध्यात्मिकेऽपि(कासु) च ।
सर्वेषु विद्यादानेषु विष्णुसूर्येशशक्तिषु ॥
एतेषु मध्ये किं तत्त्वं कथय त्वं महाबल ।

End:

यदा रामोऽहमस्मीति तत्त्वतः प्रवदन्ति ये ।
न ते संसारिणो नूनं राम एव न संशयः ॥
ओं सत्यमित्युपनिषत् ॥

Colophon:—श्रीरामरहस्योपनिषत्समाप्ता ॥

No. 767. रामरहस्योपनिषत्.

RĀMARAHASYŌPANIṢAD.

Pages, 9. Lines, 11 on a page.

Begins on fol. 97*b* of the MS. described under No. 247.
Complete. Same as the last.

No. 768. रुद्रहृदयोपनिषत्.

RUDRAHṚDAYŌPANIṢAD.

Pages, 6. Lines, 19 on a page.

Begins on fol. 105*b* of the MS. described under No. 246. Complete.

This Upaniṣad teaches that all the gods and all the animate and inanimate objects of creation are only manifestations of Mahēśvara and Umā, and explains by means of reasoning and authority the identity of the individual soul with the Supreme Being.

Beginning:

सह नाववत्विति शान्तिः ।

हृदय(यं) कुण्डली भस्मरुद्राक्षगणदर्शनम् ।

तारसारमहावाक्यपञ्चब्रह्माग्निहोत्रकम् ॥

प्रणम्य शिरसा पादौ शुको व्यासमुवाच ह ।

को देवस्सर्वदेवेषु कस्मिन्देवाश्च सर्वशः ॥

कस्य शुश्रूषणं(णात्) नित्यं प्रीता देवा भवन्तु मे ।

तस्य तद्वचनं श्रुत्वा प्रत्युवाच पिता शुकः(म्) ॥

श्रीवेदव्यास उवाच । सर्वदेवात्मको रुद्रः सर्वदेवाः शिवात्मकाः ।

रुद्रस्य दक्षिणे पार्श्वे रविर्ब्रह्मा त्रयोऽग्नयः ॥

End:

तद्वत्स्वात्मपरिज्ञानी कुत्रचिन्नैव गच्छति ।

स यो ह वै तत्परमं ब्रह्म यो वेद वै मुनिः ॥

ब्रह्मैव भवति स्वस्थसच्चिदानन्दमात्रकः ।

इत्युपनिषत् ॥

Colophon:—श्रीरुद्रहृदयोपनिषत्समाप्ता ॥

No. 769. रुद्रहृदयोपनिषत्.

RUDRAHṚDAYŌPANIṢAD.

Pages, 4. Lines, 12 on a page.

Begins on fol. 154*b* of the MS. described under No. 247.

Complete. Same as the last.

No. 770. रुद्राक्षजाबालोपनिषत्.

RUDRĀKṢAJĀBĀLŌPANIṢAD.

Pages, 8. Lines, 18 on a page.

Begins on fol. 124*b* of the MS. described under No. 246.

Complete.

This Upaniṣad explains the origin of the Rudrākṣa-bead, its varieties and their characteristics; it also explains in what manner it should be obtained by one, how and when it should be worn, and what benefits it confers on the wearer.

Beginning:

आप्यायन्त्विति शान्तिः ।

अथ हैनं कालाग्निरुद्रो(द्रं) भुसुण्डः पप्रच्छ कथं रुद्राक्षोत्पत्तिस्तद्धारणात् किम्फलमिति । तं होवाच भगवान् कालाग्निरुद्रः । त्रिपुरवधार्थमहं निमीलिताक्षोऽभवं तेभ्यो जलबिन्दवो भूमौ पतितास्ते रुद्राक्षा जातास्सर्वानुग्रहार्थाय । तेषां नामोच्चारणमात्रेण दशगोप्रदानफल(लं)दर्शनसंस्पर्शनाभ्यां द्विगुणफलमत ऊर्ध्वं वक्तुं न शक्नोमि ॥

End:

अथ सदाशिवस्संहारकाले संहारं कृत्वा संहाराक्षं मुकुलीकरोति । तन्नयनाज्जाता रुद्राक्षा इति होवाच तस्माद्रुद्राक्षत्वमिति कालाग्निरुद्रः प्रोवाच ।

* * * *

य इमामुपनिषदं ब्राह्मणस्सायमधीयानो दिवसकृतं पापं नाशयति ।

* * * *

शिवसायुज्यमवाप्नोति न च पुनरावर्तते न च पुनरावर्तत इति ॥
ओं सत्य मित्युपनिषत् ।

Colophon :—रुद्राक्षजाबालोपनिषत् समाप्ता ।

No. 771. रुद्राक्षजाबालोपनिषत्.
RUDRĀKṢAJĀBĀLŌPANIṢAD.

Pages, 4. Lines, 12 on a page.

Begins on fol. 161*a* of the MS. described under No. 247.

Complete. Same as the last.

No. 772. रुद्राक्षजाबालोपनिषत्.
RUDRĀKṢAJĀBĀLŌPANIṢAD.

Pages, 2. Lines, 5 on a page.

Begins on fol. 74*b* of the MS. described under No. 217.

Complete.

The beginning is the same so far as it is extracted under No 770 ; but, after that, this goes on to say :—

कुमार ततो जपमन्त्रकधारणविधिं कथयामि ।

There is no Śānti and the ऋषि who questions the god कालाग्निरुद्र is here सनत्कुमार but not भुसुण्ड.

The extracts from the end differ from those given under No. 770.

End :

प्राणानायम्य समस्तपापक्षयार्थं शिवज्ञानावाप्तयर्थं समस्त-मन्त्रैस्सह रुद्राक्षधारणङ्करिष्ये इत्येवं विद्वान् ब्रह्मचारी गृहस्थो वानप्रस्थो यतिर्वा धारयेत् । पदे पदेऽश्वमेधफलमाप्नोति इत्याह भगवान् कालाग्नि-रुद्रः । एतद्येनाधीतं सोऽहमेव भवत्यों सत्यमित्युपनिषत् ॥

No. 773. रुद्राक्षजाबालोपनिषत्.

RUDRĀKṢAJĀBĀLŌPANIṢAD.

Pages, 4. Lines, 7 on a page.

Begins on fol. 64*b* of the MS. described under No. 285.

This forms the last portion of the Upaniṣad.

Beginning :

अथ कालाग्निरुद्रं भगवन्तं सनत्कुमारः पप्रच्छ अधीहि भगवन् रुद्राक्षधारणविधि(म्)[मनुब्रूहीति होवाच]। तस्मिन् समये ऋभुनिदाघकात्यायनदत्तात्रेयभारद्वाजकपिलवसिष्ठपैलामी(प्पलादाः) कालाग्निरुद्रं परिसमेत्योवाच (चुः)। अथ कालाग्निरुद्रः किमर्थं भवतामागमनमिति होवाच। रुद्राक्षधारणविधिं सर्वे श्रोतुमिच्छाम इति। अथ कालाग्निः प्रोवाच। रुद्रस्य नयनादुत्पन्ना रुद्राक्षीति ख्यायते तस्माद्रुद्राक्षित्वमिति। अथ कालाग्निरुद्रः प्रोवाच तद्रुद्राक्षिं वाग्विषयं कृते दशगोप्रदाने यत्फलमवाप्नोति तत्फलमश्नुते। स एष ज्योतिरुद्राक्षीति होवाच। तद्रुद्राक्षिं करैः स्प्रष्टुमिच्छन्(तः) शतगोप्रदानफलं भवति

End :

अथ कालाग्निरुद्रः प्रोवाच। योगध्यानानां शिव एको ध्येयश्शिवङ्करः सर्वमन्यत्परित्यज्यैतामधीत्य द्विजो वा क्षत्रियो वाधीते गर्भवासान्मुच्यत इत्यों सत्यम्। अथ कालाग्निरुद्रः प्रोवाच। सकृज्जप्त्वैव शुचिः पूतः कर्मण्यो भवति द्वितीयं जप्त्वा गाणपत्यमवाप्नोति तृतीयं जप्त्वा देवमेवानुप्रविशत्यों सत्यमों सत्यमित्युपनिषत् ॥

Colophon :—इत्यथर्वणे रुद्राक्षजाबालोपनिषत् समाप्ता ॥

No. 774. लिङ्गधारणोपनिषत्.

LIṄGADHĀRAṆŌPANIṢAD.

Pages, 5. Lines, 5 on a page.

Begins on fol. 75*b* of the MS. described under No. 217.

Complete.

This Upaniṣad teaches that all beings should wear the Liṅga, and explains how it should be worn and what benefits accrue to one by wearing it.

Beginning :

ओं धर्मविज्ञानसाज्ञानबुद्धिश्च ज्ञानान्मोक्षात्कारणम्मोक्षान्मुक्तिस्वरूपः । ब्रह्मज्ञानाज्ञानबुद्धिश्च लिङ्गैक्यं देहदेहिलिङ्गभेदेन अज्ञानज्ञानबुद्धिश्च चातुर्वर्णानाधारणङ्कुर्यात् । पशुपक्षिमृगकीटकलिङ्गधारणमुच्यते । पञ्चबन्धस्वरूपेण पञ्चबन्धाज्ञानस्वरूपं पिण्डाज्जननं तज्जननकाले धारणमुच्यते । सर्वलिङ्गस्थापयेति पाणिमन्त्रम् । अयम्मे हस्तो भगवानिति धारयेत् ।

End :

ततो धारयन्तीन्द्रः पूषा वरुणो मित्र अग्निर्यममदित्या एत विश्वे च देवाः उत्तरास्मिन्ज्योतिषु धारयेत् । सति संयुक्तं लिङ्गं मोक्षमेव धारणं लिङ्गं विद्यादेवम् (१) तिवमादतं कुर्याज्जे तत्सवितुर्वरेति लिङ्गोपनिषत्समाप्ता ॥

(२) इत्येवं वेदेत्युपनिषत् सदा लिङ्गसन्निहिता भक्तिः शान्तिशिष्टः प्रसिद्धः असा.

No. 775. वज्रपञ्जरोपनिषत्.

VAJRAPAÑJARŌPANIṢAD.

Substance, palm-leaf. Size, 15½ × 1¼ inches. Pages, 5. Lines, 4 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

This is not included in the 108 Upaniṣads mentioned in the Muktikōpaniṣad. It gives certain Mantras to be used when smearing the various parts of the body with Vibhūti or the sacred ashes.

Begins on fol. 8*a*. The other works herein are : A Telugu work 1*a*, Praṇavasvarūpavivaraṇam 2*a*, Nṛsiṁhamantraḥ 11*a*, Śūlinīmantraḥ

12*a*, Śūlinīstavaḥ 18*a*, Tripurasundarīstōtram 19*a*, Pañcavaktrahanūmanmantraḥ 21*a*, Śrīvidyāṣōḍaśākṣarīmantraḥ 23*a*, Mantrasaṅgrahaḥ 24*a*, Mantraprayōgaḥ 30*a*.

Beginning:

सह नाववत्विति शान्तिः ।

वज्रपञ्जरेण भस्मोद्धारणं कुर्यात् वामकरे भस्म गृहीत्वा सद्योजातमिति पञ्चब्रह्ममन्त्रः त्रियम्बकं जातवेदसे गायत्र्या मानस्तोकैरभिमन्त्र्य श्रीविद्यया शिरसि एवं वद वद वाग्वादिनि ॥

End:

त्रिपुण्ड्रतानि कथितानि ललाटे . . . दैवलिखितानि दुरक्षराणि । सह नाववतु ओं शान्तिः ॥

एतानि तानि शिवमन्त्रपवित्रितानि
भस्मानि कामदहनाङ्गविभूषणानि ।
त्रैपुण्ड्रतानि कथितानि ललाटपट्टे
लुप्यन्ति दैवलिखितानि दुरक्षराणि ॥

No. 776. वज्रसूच्युपनिषत्.
VAJRASŪCYUPANIṢAD.

Pages, 3. Lines, 19 on a page.

Begins on fol. 104*b* of the MS. described under No. 250.

Complete.

This Upaniṣad enquires into the meaning of the word Brāhmaṇa and establishes that it is applicable as a title to all those who are in possession of the knowledge of the Supreme Being, irrespective of the caste to which they belong by birth.

Beginning:

आप्यायन्त्विति शान्तिः ।

वज्रसूचीं प्रवक्ष्यामि शास्त्रमज्ञानभेदनम् ।
दूषणं ज्ञानहीनानां भूषणं ज्ञानचक्षुषाम् ॥

ब्रह्मक्षत्रियवैश्यशूद्राश्चत्वारो वर्णास्तेषां वर्णानां ब्राह्मण एव प्रधान इति वेदवचनानुरूपं स्मृतिभिरप्युक्तं तत् चोद्यमस्ति । को वा ब्राह्मणो नाम किं जीवः किं देहः किं जातिः किं ज्ञानं किं कर्म को धार्मिक इति ॥

End:

अन्यथा ब्राह्मणत्वसिद्धिर्नास्त्येव । सच्चिदानन्दमात्मानमद्वितीयं ब्रह्म भावयेदात्मानं सच्चिदानन्दं ब्रह्म भावयेदित्युपनिषत् ॥

Colophon :—वज्रसूच्युपनिषत्समाप्ता ॥

No. 777. वज्रसूच्युपनिषत्.
VAJRASŪCYUPANIṢAD.

Pages, 2. Lines, 11 on a page.

Begins on fol. 46*a* of the MS. described under No. 247.

Complete. Same as the last.

No. 778. वज्रसूच्युपनिषत्.
VAJRASŪCYUPANIṢAD.

Pages, 4. Lines, 7 on a page.

Begins on fol. 10*b* of the MS. described under No. 217.

Complete. Same as the last.

No. 779. वज्रसूच्युपनिषत्.
VAJRASŪCYUPANIṢAD.

Pages, 2. Lines, 6 on a page.

Begins on fol. 15*a* of the MS. described under No. 300.

Complete. Same as the last.

No Śanti is given.

No. 780. वज्रसूच्युपनिषत्.
VAJRASŪCYUPANIṢAD.

Pages, 3. Lines, 6 on a page.

Begins on fol. 14*b* of the MS. described under No. 284.

Complete. Same as the last.

No. 781. वज्रसूच्युपनिषत्.

VAJRASŪCYUPANIṢAD.

Substance, palm-leaf. Size, 15¾ × 1⅜ inches. Pages, 2. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 168*a*.

Complete.

The other works herein are :—

	Fol.
Śivāṣṭakam	1*a*
Pārvatīśāṣṭakam.. ..	2*a*
Sālaṅkēśvarāṣṭakam ..	3*a*
Ṣaḍakṣarīmantrāṣṭakam..	4*a*
Bhujaṅgaprayātastavaḥ.	6*a*
Śivasahasranāmastōtram.	8*a*
Śivabhujaṅgastavaḥ ..	15*a*
Rāvaṇapañcacāmarastōtram	27*a*
Tāṇḍavastavaḥ ..	29*a*
Paṭṭaśailapatyaṣṭakam ..	30*b*
Vīrabhadrāṣṭakam ..	31*b*
Do. ..	32*a*
Pañcaratnam	32*b*
Gaṅgāṣṭakam	33*a*
Candraśekharāṣṭakam ..	35*b*
Kāśīpuryaṣṭakam (Vyāsāṣṭakam)	38*a*
Bāṇāṣṭakam	38*b*
Ādityahṛdayam.. ..	40*a*
Ādityakavacam	44*a*
Ādityamālāmantraḥ ..	45*a*
Śyāmalādaṇḍakam ..	46*a*
Śivadhyānam	71*a*
Gurubasavaliṅgapūjā ..	89*a*

	Fol.
Śivasandhyāmantraḥ ..	93*a*
Aparādhastavaḥ ..	99*a*
Ṣadgururagaḍa ..	103*a*
Mṛtyuñjayamānasapūjā.	108*a*
Śivapūjāvidhiḥ ..	119*a*
Namaśśivāyaragaḍa ..	127*a*
Vināyakapūjavidhiḥ ..	130*a*
Udāharaṇagadyam ..	132*a*
Vṛṣabhāṣṭakam ..	135*a*
Pañcaprakāragadyam ..	136*a*
Namaskāragadyam ..	138*b*
Muktapadagrastastutiḥ ..	140*b*
Akṣaramālāgadyam ..	141*b*
Bhuvanēśvarīstōtram ..	146*a*
Nīlakaṇṭhastōtram ..	147*a*
Rudrakavacam ..	148*a*
Prāsādapancākṣarīmantraḥ	149*a*
Śarabhasāluvamantraḥ ..	149*b*
Vīrabhadrakavacastōtram.	149*b*
Mārkaṇḍēyastōtram ..	154*b*
Śivarātrivrataphalam ..	156*a*
Ūrdhvapuṇḍradhāraṇadūṣaṇam. ..	164*a*
Śivapūjāvidhiḥ ..	165*a*
Do.	169*a*

The Śānti is not mentioned in the beginning; but at the end the **Colophon** runs thus—इति वज्रसूच्याथर्वणवेदे वज्रसूची समाप्ता ॥

No **782.** वज्रसूच्युपनिषत्.
VAJRASŪCYUPANIṢAD.

Pages, 3. Lines, 7 on a page.

Begins on fol. 120*a* of the Ms. described under No. 365.

Complete. Neither the Śānti-pāṭha nor the colophon is given.

No. **783.** वराहोपनिषत्.
VARĀHŌPANIṢAD.

Pages, 30. Lines, 22 on a page.

Begins on fol. 163*a* of the MS. described under No. 246.

Complete.

This Upaniṣad, after explaining the primary principles, as consisting of 24, 36 or 96 Tattvas, according as they are considered more or less comprehensively, describes the characteristics of one who is fit to learn the Brahma-Vidyā; it emphasises the difficulty which is necessarily found in association with the inadequate language of man, when it is used in describing the nature of the highest knowledge about the Brahman; and it concludes with a discourse on the value and purpose of Yōga.

Beginning:

सह नाववत्विति शान्तिः ।

अथ कुहुर्वै महामुनिर्देवमानेन द्वादशवत्सरं तपश्चचार । तदासने वराहरूपी भगवान् प्रादुरभूत् । स होवाचोत्तिष्ठोत्तिष्ठ वरं वृणीष्वेति । स उदतिष्ठत् । तस्मै नमस्कृत्योवाच भगवान् . . .

कामिभिर्यत्कामितं तत्तत्त्वत्सकाशात्स्वप्नेऽपि समस्तवेदशास्त्रेतिहासपुराणानि समस्तविद्याजालानि ब्रह्मादयस्सुरास्सर्वे त्वद्रूपज्ञानान्मुक्तिमाहुरतस्त्वद्रूपप्रतिपादिकां ब्रह्मविद्यां ब्रूहीति होवाच ॥

End:

एतदुपनिषदं योऽधीते सोऽग्निपूतो भवति। स वायुपूतो भवति। सुरापानात्पूतो भवति। स्वर्णस्तेयात्पूतो भवति। स जीवन्मुक्तो भवति। तदेतदृचाभ्युक्तम्। तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते। विष्णोर्यत्परमम्पदम्॥

हरिः ओम्॥ इति पञ्चमोऽध्यायः॥

Colophon :— वराहोपनिषत्समाप्ता॥

No. 784. वराहोपनिषत्.

VARĀHŌPANIṢAD.

Pages, 12. Lines, 12 on a page.

Begins on fol. 176*b* of the MS. described under No. 247.

Complete. Same as the last.

No. 785. वराहोपनिषत्.

VARĀHŌPANIṢAD.

Pages, 3. Lines, 5 on a page.

Begins on fol. 41*a* of the MS. described under No. 139.

Complete.

Beginning:

वराहोपनिषत्

अथ श्रीवराहरूपिणं भगवन्तं प्रणम्य सनत्कुमारः पप्रच्छ अधीहि भगवन् ऊर्ध्वपुण्ड्रविधिं किं द्रव्यं किं स्थानं का रेखा का मुद्रा कः कर्ता किं फलमिति च। तं होवाच क्षीराब्धिश्वेतद्वीपे क्षीरखण्डानानीय सटाभिर्विदलनात् श्वेतमृत्तिका ख्याता॥

End:

सुज्ञानं लब्ध्वा तद्विष्णोः परमं पदमवाप्नोति न च पुनरावर्तत इति भगवान् वराहरूपी य एवं वेदेत्युपनिषत् ॥

No. 786. वराहोपनिषत्.
VARĀHŌPANIṢAD.

Pages, 5. Lines, 5 on a page.

Begins on fol. 192*a* of the MS. described under No. 29.

Incomplete.

Another copy like the preceding.

No. 787. वासुदेवोपनिषत्.
VĀSUDĒVŌPANIṢAD.

Pages, 4. Lines, 22 on a page.

Begins on fol. 265*a* of the MS. described under No. 250.

Complete.

This Upaniṣad explains how all the Brahmins should wear the Ūrdhva-Puṇḍra mark on the forehead with Gōpicandana and what benefit accrues to them therefrom.

Beginning:

ओम् आप्यायन्त्विति शान्तिः ॥

ओं नमस्कृत्य भगवान् नारदस्सर्वेश्वरं वासुदेवं पप्रच्छ अधीहि भगवन् पुण्ड्रविधिम् । द्रव्यमन्त्रस्थानादिविधिं मे ब्रूहीति । तं होवाच भगवान् वासुदेवः वैकुण्ठस्थानादुत्पन्नं मम प्रीतिकरं मद्भक्तैर्ब्रह्मादिभिर्धारितं विष्णुचन्दनं ममाङ्गे प्रतिदिनमालिप्तं गोपीभिः प्रक्षालनाद्गोपीचन्दनम् ।

End:

एवं विधिना गोपीचन्दनन्धारयेत् । यस्त्वधीते वा सर्वपातकेभ्यः पूतो भवति । पापबुद्धिस्तस्य न जायते । स सर्वेषु तीर्थेषु स्नातो भवति । स सर्वैर्यज्ञैर्याजितो भवति । स सर्वैर्देवैः पूजितो भवति । श्रीमन्नारायणे मय्य-

चञ्चला भक्तिश्च भवति । स सम्यक् ज्ञानञ्च लब्ध्वा विष्णुसायुज्यमवाप्नोति । न च पुनरावर्तते न च पुनरावर्तते इत्याह भगवान् वासुदेवः । यस्त्वेतद्वाधीते सोऽप्येवमेव भवतीत्यों सत्यमित्युपनिषत् ॥

Colophon :—वासुदेवोपनिषत्समाप्ता ॥

No. 788. वासुदेवोपनिषत्.
VĀSUDĒVŌPANIṢAD.

Pages, 2. Lines, 13 on a page.

Begins on fol. 105*a* of the MS. described under No. 247.

Complete. Same as the last.

No. 789. वासुदेवोपनिषत्.
VĀSUDĒVŌPANIṢAD.

Pages, 3. Lines, 7 on a page.

Begins on fol. 59*a* of the MS. described under No. 285.

Complete.

There is no Śānti given.

No. 790. वासुदेवोपनिषत्.
VĀSUDĒVŌPANIṢAD.

Pages, 2. Lines, 8 on a page.

Begins on fol. 84*a* of the MS. described under No. 256.

Complete. Same as the last.

No. 791. शरभोपनिषत्.
ŚARABHŌPANIṢAD.

Pages, 6. Lines, 22 on a page.

Begins on fol. 209*a* of the MS. described under No. 250.

Complete.

This Upaniṣad establishes the superiority of Rudra to Viṣṇu by explaining how Rudra, incarnating himself as Śarabha, destroyed the man-lion incarnation of Viṣṇu, and then concludes by identifying Śiva with the Supreme Being of the Vēdānta.

Beginning :

भद्रं कर्णेभिरिति शान्तिः ।

अथ हैनं पैप्पलादो ब्रह्माणमुवाच भो भगवन् ब्रह्मविष्णुरुद्राणां मध्ये को वा अधिकतरो ध्येयस्स्यात्तत्त्वमेव नो ब्रूहीति ।

तस्मै स होवाच पितामहश्च हे पैप्पलाद श्रु(ति)वाक्यमेतत् ।
बहूनि पुण्यानि कृतानि येन तेनैव लभ्यः परमेश्वरोऽसौ ।
यस्याङ्गजोऽहं हरिरुद्रमुख्या मोहान्न जानन्ति सुरेन्द्रमुख्याः ।

End :

प्रभुं वरेण्यं पितरं महेशं यो ब्रह्माणं विदधाति तस्मै ॥
शिवभक्ताय दातव्यं ब्रह्मकर्मोक्तधीमते ।

* * * *

स सर्वान्वेदानधीतो भवति। सर्वान् देवान् ध्यातो भवति। स समस्त-महापातकोपपातकात्पूतो भवति । तस्मादविमुक्तमाश्रितो भवति । स सततं शिवप्रियो भवति स शिवसायुज्यमेति न स पुनरावर्तते न स पुनरावर्तत इत्याह भगवान् ब्रह्मेत्युपनिषत् ॥

Colophon :— शरभोपनिषत्समाप्ता ॥

No. **792**. शरभोपनिषत्.
ŚARABHŌPANIṢAD.

Pages, 2. Lines, 12 on a page.

Begins on fol. 85*a* of the MS. described under No. 247.

Complete. Same as the last.

No. 793. शाट्यायनीयोपनिषत्.

ŚĀṬYĀYANĪYŌPANIṢAD.

Pages, 8. Lines, 21 on a page.

Begins on fol. 177*b* of the MS. described under No. 246.

Complete.

This Upaniṣad enjoins renunciation and asceticism on the ground that the mind is the basis of all happiness; it describes the various classes and characteristics of Sannyāsins and especially of the three - staff order known as Tridaṇḍins.

Beginning:

पूर्णमद इति शान्तिः ।

मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम् ॥
समासक्तं यदा चित्तं जन्तोर्विषयगोचरे ।
यदेव ब्रह्मणि स्यात्तत् तेन मुच्येत बन्धनात् ॥
चित्तमेव हि संसारस्तत् प्रयत्नेन शोधयेत् ।

End:

यथैव तेन गुरुर्भावनीयस्तथैव सान्नं न भुनक्ति श्रुतं तत् ॥

गुरुरेव परो धर्मो गुरुरेव परा गतिः ।
एकाक्षरप्रदातारं यो गुरुं नाभिवन्दति ॥
तस्य श्रुतं तपो ज्ञानं स्रवत्यामघटाम्बुवत् ।
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ॥
स ब्रह्मवित् परं प्रेयादिति वेदानुशासनम् ।

इत्युपनिषत् ।

Colophon:— शाट्यायनीयोपनिषत् समाप्ता ॥

No. 794. शाट्यायनीयोपनिषत्.
ŚĀṬYĀYANĪYŌPANIṢAD.

Pages. 3. Lines, 12 on a page.

Begins on fol. 182*a* of the MS. described under No. 247.

Complete. Same as the last.

No. 795. शाण्डिल्योपनिषत्.
ŚĀṆḌILYŌPANIṢAD.

Pages, 25. Lines, 22 on a page.

Begins on fol. 269*b* of the MS. described under No. 250.

Complete.

This Upaniṣad teaches the practice of Yōga as a means of coming into the possession of Brahma-Vidyā, and explains the nature and characteristics of the Brahman, and explains also the manifestation of the universe in the Brahman.

Beginning:

भद्रङ्कर्णेभिरिति शान्तिः ।

शाण्डिल्यो ह वाथर्वाणम्पप्रच्छात्मलाभोपायभूतमष्टाङ्गयोगमनुब्रूहीति । स होवाचाथर्वा यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टाङ्गानि । तत्र दश यमाः । तथा नियमाः । आसनान्यष्टौ । त्रिः प्राणायामः । पञ्च प्रत्याहारः । तथा धारणाः । द्विप्रकारन्ध्यानं समाधिस्त्वेकरूपः ॥

End:

अथ कस्मादुच्यते महेश्वर इति यस्मान्महत ईशशब्दध्वन्या चात्मशक्त्या तस्मादुच्यते महेश्वर इति ।

अथ योऽस्य निरुक्तानि वेद स सर्वं वेद । अथ यो ह वै विद्यैनं परममुपास्ते सोऽहमिति स ब्रह्मविद्भवति ।

एवं यस्सततन्ध्यायेद्देवदेवं सनातनम् ।
स मुक्तस्सर्वपापेभ्यो निःश्रेयसमवाप्नुयात् ॥

इत्यों सत्यमित्युपनिषत् ॥ तृतीयोऽध्यायः ॥

Colophon :— शाण्डिल्योपनिषत्समाप्ता ॥

No. 796. शाण्डिल्योपनिषत्.

ŚĀṆḌILYŌPANIṢAD.

Pages, 9. Lines, 12 on a page.

Begins on fol. 107*a* of the MS. described under No. 247.

Complete. Same as the last.

No. 797. शारीरकोपनिषत्.

ŚĀRĪRAKŌPANIṢAD.

Pages, 3. Lines, 21 on a page.

Begins on fol. 1*a* of the MS. described under No. 246.

Complete.

In this Upaniṣad are described the characteristics of the five Bhūtas or elements, the origin of the senses, the composition of the various parts of the body as made up of the Bhūtas, the four states of consciousness and the 25 principles or Tattvaṣ. The whole seems to be related to the Sāṇkhya system of Hindu philosophy.

Beginning :

सह नाववत्विति शान्तिः ।

अथातः पृथिव्यादिमहाभूतानां समवायं(:) शरीरं यत्कठिनं सा पृथिवी यद्द्रवन्तदापो यदुष्णन्तत्तेजो यत्सञ्चरति स वायुर्यत्सुषिरन्तदाकाशं श्रोत्रादीनि ज्ञानेन्द्रियाणि श्रोत्रमाकाशे वायौ त्वक् ग्लौ(अग्नौ)चक्षुरप्सु जिह्वा पृथिव्याङ्घ्राणमिति। एवमिन्द्रियाणां यथाक्रमेण शब्दस्पर्शरूपरसगन्धाश्चैते विषयाः पृथिव्यादिमहाभूतेषु क्रमेणोत्पन्नाःवाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाणि । तेषाङ्क्रमेण वचनादानगमनविसर्गानन्दाश्चैते विषयाः ॥

End:

जाग्रत्स्वप्नसुषुप्तितुरीयमिति चतुर्विधावस्थाः । ज्ञानेन्द्रियकर्मेन्द्रियान्तः-करणचतुष्टयं चतुर्दशकरणयुक्तं जाग्रत् । अन्तःकरणचतुष्टयैरेव संयुक्तः स्वप्नः । चित्तैककरणा सुषुप्तिः। केवलजीवयुक्तमेव तुरीयमिति । उन्मीलित-निमीलितमध्यस्थजीवपरमात्मनोर्मध्ये जीवात्मा क्षेत्रज्ञ इति विज्ञायते ॥

बुद्धिकर्मेन्द्रियप्राणपञ्चकैर्मनसा धिया ।
शरीरं सप्तदशभिः सूक्ष्मन्तल्लिङ्गमुच्यते ॥
मनो बुद्धिरहङ्कारः खानिलाग्निर्जलानि भूः ।
एताः प्रकृतयस्त्वष्टौ विकाराष्षोडशा[:]परे ॥
श्रोत्रं त्वक्चक्षुर्जि(षी जि)ह्वा घ्राणञ्चैव तु पञ्चमम् ।
पायूपस्थौ करौ पादौ वाक् चैव दशमी मता ॥
शब्दस्पर्शश्च रूपञ्च रसो गन्धस्तथैव च ।
त्रयोविंशतिरेतानि तत्त्वानि प्रकृतानि तु ॥
चतुर्विंशतिरव्यक्तं प्रधानम्पुरुषः परः ।
इत्युपनिषत् ॥

Colophon :— शारीरोपनिषत् समाप्ता ॥

No. **798.** शारीरकोपनिषत्.

ŚĀRĪRAKŌPANIṢAD.

Pages, 2. Lines, 14 on a page.

Begins on fol. 123*a* of the MS. described under No. 247.

Complete. Same as the last.

No. **799.** शारीरकोपनिषत्.

ŚĀRĪRAKŌPANIṢAD.

Pages, 2. Lines, 5 on a page.

Begins on fol. 8*b* of the MS. described under No. 300.

Complete.

Another copy.

No. 800. शारीरकोपनिषत्.

ŚĀRĪRAKŌPANIṢAD.

Pages, 4. Lines, 6 on a page.

Begins on fol. 16*a* of the MS. described under No. 284.

Another copy. Complete.

No. 801. शारीरकोपनिषत्.

ŚĀRĪRAKŌPANIṢAD.

Pages, 3. Lines, 6 on a page.

Begins on fol. 12*b* of the MS. described under No. 116.

Complete.

Another copy.

No. 802. शारीरकोपनिषत्.

ŚĀRĪRAKŌPANIṢAD.

Pages, 2. Lines, 8 on a page.

Begins on fol. 117*b* of the MS. described under No. 361.

Complete.

No Śānti is given.

No. 803. शारीरकोपनिषत्.

ŚĀRĪRAKŌPANIṢAD.

Pages, 2. Lines, 7 on a page.

Begins on fol. 80*a* of the MS. described under No. 256.

Complete. Same as the last.

No. 804. श्वेताश्वतरोपनिषत्.

ŚVĒTĀŚVATARŌPANIṢAD.

Pages, 14. Lines, 22 on a page.

Begins on fol. 6*a* of the MS. described under No. 250.

Complete.

This Upaniṣad explains the characteristics of the Supreme Being and of the individual soul, and teaches meditation and worship by means of the Praṇava, the Supreme Person being herein identified with Rudra as the bestower of salvation.

Beginning:

सह नाववत्विति शान्तिः ।

ब्रह्मवादिनो वदन्ति ।

किं कारणं ब्रह्म कुतःस्म जाताः जीवाः केन क्व च संप्रतिष्ठाः ।

अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम् ॥

कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम् ।

संयोग एषां न त्वात्मभावादात्मा ह्यनीशः सुखदुःखहेतोः ॥

End:

तपःप्रभावाद्देवप्रसादाच्च ब्रह्म ह श्वेताश्वतरोऽथ विद्वान् ।

अत्याश्रमिभ्यः परमः पवित्रं प्रोवाच सम्यगृषिसङ्घजुष्टम् ॥

वेदान्ते परमं गुह्यं पुरा कर्मप्रबोधितम् ।

नाप्रशान्ताय दातव्यं नापुत्रायाशिष्याय वै पुनः ॥

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।

तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

प्रकाशन्ते महात्मन इत्युपनिषत् ॥ षष्ठोऽध्यायः ॥

Colophon:—श्वेताश्वतरोपनिषत् समाप्ता ॥

No. 805. श्वेताश्वतरोपनिषत्.

ŚVĒTĀŚVATARŌPANIṢAD.

Pages, 7. Lines, 11 on a page.

Begins on fol. 3*a* of the MS. described under No. 247.

Complete. Same as the last.

No. 806. श्वेताश्वतरोपनिषत्.

ŚVĒTĀŚVATARŌPANIṢAD.

Pages, 13. Lines, 6 on a page.

Begins on fol. 35*b* of the MS. described under No. 254.

Another copy. Complete.

No. 807. श्वेताश्वतरोपनिषत्.

ŚVĒTĀŚVATARŌPANIṢAD.

Pages, 5. Lines, 8 on a page.

Begins on fol. 93*b* of the MS. described under No. 276.

Another copy. Incomplete.

No. 808. श्वेताश्वतरोपनिषत्.

ŚVĒTĀŚVATARŌPANIṢAD.

Pages, 21. Lines, 11 on a page.

Begins on fol. 125*b* of the MS. described under No. 180.

Complete.

The Śānti herein given is भद्रं कर्णेभिः.

No. 809. श्वेताश्वतरोपनिषत्.

ŚVĒTĀŚVATARŌPANIṢAD.

Pages, 9. Lines, 8 on a page.

Begins on fol. 63*b* of the MS. described under No. 256.

Complete. Same as the last.

No. 810. श्वेताश्वतरोपनिषद्दीपिका.

ŚVĒTĀŚVATARŌPANIṢADDĪPIKĀ.

Pages, 158. Lines, 6 on a page.

Begins on fol. 101*a* of the MS. described under No. 316.

Complete.

This is a commentary on Śvētāśvatarōpaniṣad by Vijñānōttama, pupil of Jñānōttama and is according to the Advaita school.

Beginning:

* * * *

निगमान्तप्रदीपाय निस्सङ्गसुखसंविदे ।
संसारतापनोदाय विद्याश्रीपतये नमः ॥

* * * *

विज्ञानोत्तममुनीन्द्राय नमः प्रत्यक्सुखात्मने ॥

नमः परमऋषिभ्यो नमो ब्रह्मविद्यासम्प्रदायकर्तृभ्यः। ब्रह्मवादिनो वदन्तीतीदं ब्राह्मणवाक्यं वादिनो वादशीलाः विज्ञानात्तेषूर्ध्वमसम्भावना-विपरीतभावनोत्पादका विघ्नाः परिहीयन्ते

End:

यस्मात्तस्माद्विद्यार्थिभिर्देवतागुरुविषया निरुपाधिकभक्तिः कर्तव्येत्यभिप्रायः । द्विर्वचनमध्यायपरिसमाप्तिद्योतनार्थमादरार्थञ्च ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमज्ज्ञानोत्तमपूज्यपादशिष्यस्य श्रीमद्विज्ञानोत्तमभगवतः कृतौ श्वेताश्वतरोपनिषद्विवरणे षष्ठोऽध्यायः समाप्तः ।

समाप्ता चेयमुपनिषत् । हरिः ओम् ॥

No. 811. सन्न्यासोपनिषत्.
SANNYĀSOPANIṢAD.

Pages, 16. Lines, 21 on a page.

Begins on fol. 23*a* of the MS. described under No. 246.

Complete

This Upaniṣad explains how the order of Sannyāsins is entered into, who are fit to enter the order and what the characteristics and the duties of the six classes of Sannyāsins are.

Beginning:

आप्यायन्त्विति शान्तिः ।

अथातस्सन्न्यासोपनिषदं व्याख्यास्यामः । योऽनुक्रमेण सन्न्यस्यति स सन्न्यस्तो भवति । कोऽयं सन्न्यास उच्यते कथं सन्न्यस्तो भवति । य आत्मानं क्रियाभिर्गुप्तं करोति मातरं पितरं भार्यां पुत्रान् बन्धूननुमोदयित्वा ये चास्यर्त्विजस्तान् सर्वांश्च पूर्ववद्वृणीत्वा वैश्वानरेष्टिं निर्वपेत् ॥

End:

नापृष्टः कस्यचिद्ब्रूयात् न चान्यायेन पृच्छतः ।
जानन्नपि हि मेधावी जडवल्लोकमाचरेत् ॥
सर्वेषामेव पापानां सङ्घाते समुपस्थिते ।
तारं द्वादशसाहस्रमभ्यसेच्छेदनं हि तत् ॥
यस्तु द्वादशसाहस्रं प्रणवं जपतेऽन्वहम् ।
तस्य द्वादशभिर्मासैः परं ब्रह्म प्रकाशते ॥

इत्युपनिषत् ।

Colophon:—सन्न्यासोपनिषत् समाप्ता ॥

No. 812. सन्न्यासोपनिषत्.
SANNYĀSŌPANIṢAD.

Pages, 6. Lines, 3 on a page.

Begins on fol. 129*b* of the MS. described under No. 247.

Complete. Same as the last.

No. 813. सन्न्यासोपनिषत्.
SANNYĀSŌPANIṢAD.

Pages, 16. Lines, 6 on a page.

Begins on fol. 10*a* of the MS. described under No. 482.

Complete.

Another copy.

No. 814. सरस्वतीरहस्योपनिषत्.
SARASVATĪRAHASYŌPANIṢAD.

Pages, 9. Lines, 21 on a page.

Begins on fol. 195*a* of the MS. described under No. 246.

Complete.

This Upaniṣad teaches the worship of Sarasvatī, the goddess of learning, by means of ten Ṛks in the Vēdic style and ten stanzas in the Ślōka style: and explains the Ṛṣi, Chandas, Dēvatā, Prayōga, Nyāsa, &c., in relation to those Ṛks for conducting her worship.

Beginning:

ओं सह नाववत्विति शान्तिः ।

ऋषयो ह वै भगवन्तमाश्वलायनं सम्पूज्य पप्रच्छुः ।

केनोपायेन तज्ज्ञानं तत्पदार्थावभासकम् ।

यदुपासनया तत्त्वज्ञानासि भगवन्वद ॥

सरस्वतीन्दशश्लोक्या सऋचा बीजमिश्रया ।
स्तुत्वा जप्त्वा परां सिद्धिमलभन्मुनिपुङ्गवाः ॥

ऋषय ऊचुः ।

कथं सारस्वतप्राप्तिः केन ध्यानेन सुव्रत ।
महासरस्वती येन तुष्टा भगवती वद ॥

स होवाचाश्वलायनः ।

End:

देहाभिमाने गलिते विज्ञाते परमात्मनि ।
यत्र यत्र मनो याति तत्र तत्र परामृतम् ॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥
मयि जीवत्वमीशत्वं कल्पितं वस्तुतो न हि ।
इति यस्तु विजानाति स मुक्तो नात्र संशयः ॥

इत्युपनिषत् ॥

Colophon:—सरस्वत्युपनिषत्समाप्ता ॥

No. 815. सरस्वतीरहस्योपनिषत्.
SARASVATĪRAHASYŌPANIṢAD.

Pages, 3. Lines, 15 on a page.

Begins on fol. 187*a* of the MS. described under No 247.

Complete. Same as the last.

No. 816. सर्वसारोपनिषत्.
SARVASĀRŌPANIṢAD.

Pages, 6. Lines, 19 on a page.

Begins on fol. 95*b* of the MS. described under No. 250.

Complete.

In this Upaniṣad questions regarding bondage and salvation, true and false knowledge, the various states of consciousness, the

nature of the soul as determined by its functions in the body, the individual soul and Supreme Soul, and the various states of the Supreme Soul, are all briefly dealt with; and the whole of the Vēdānta is thus summarised.

Beginning:

सर्वसारन्निरालम्बं रहस्यं वज्रसूचिकम् ।
तेजोनादध्यानविद्यायोगतत्त्वात्मबोधकम् ॥

ओं सह नाववत्विति शान्तिः ।

कथं बन्धः कथं मोक्षः काविद्या का विद्येति जाग्रत्स्वप्नसुषुप्तितुर्यञ्च कथम् । अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयकोशाः कथम् । कर्ता जीवः पञ्चवर्गः क्षेत्रज्ञः साक्षी कूटस्थोऽन्तर्यामी कथम् । प्रत्यगात्मा परमात्मा माया चेति कथम् ॥

End:

स्थाणुर्नित्यस्सदानन्दः शुद्धो ज्ञानमयोऽमलः ।
आत्माहं सर्वभूतानां विभुस्साक्षी न संशयः ॥
ब्रह्मैवाहं सर्ववेदान्तवेद्यं नाहं वेद्यं व्योमवातादिरूपम् ।
रूपन्नाहन्नाम नाहन्न कर्म ब्रह्मैवाहं सच्चिदानन्दरूपम् ॥
नाहन्देहो जन्ममृत्यू कुतो मे नाहङ्कारः क्षुत्पिपासे कुतो मे ।
नाहञ्चेतश्शोकमोहौ कुतो मे नाहङ्कर्ता बन्धमोक्षौ कुतो मे ॥

इत्युपनिषत् ॥

Colophon:—सर्वसारोपनिषत्समाप्ता ॥

No. **817.** सर्वसारोपनिषत्.
SARVASĀRŌPANIṢAD.

Pages, 3. Lines, 11 on a page.

Begins on fol. 42*b* of the MS. described under No. 247.
Complete. Same as the last.

No. 818. सर्वसारोपनिषत्.
SARVASĀRŌPANIṢAD.

Pages, 6. Lines, 5 on a page.

Begins on fol. 36*a* of the MS. described under No. 284.

Incomplete. Another copy.

In this same codex there is another copy of the work on five pages of six lines each, on fol. 10*a*.

No. 819. सर्वसारोपनिषत्.
SARVASĀRŌPANIṢAD.

Pages, 4. Lines, 8 on a page.

Begins on fol. 59*a* of the MS. described under No. 276.

Incomplete.

No. 820. सर्वसारोपनिषत्.
SARVASĀRŌPANIṢAD.

Pages, 4. Lines, 7 on a page.

Begins on fol. 78*b* of the MS. described under No. 256.

Complete. Same as the last.

No 821. सामरहस्योपनिषत्.
SĀMARAHASYŌPANIṢAD.

Substance, paper. Size, $8\frac{1}{4} \times 6\frac{5}{8}$ inches. Pages, 101. Lines, 14 on a page. Character, Dēvanāgari. Condition, good. Appearance, new.

Complete.

This Upaniṣad is not one of the commonly accepted 108 Upaniṣads as given in the Muktikōpaniṣad. It appears to be a sectarian Upaniṣad detailing the doctrines of the Dvaita-Vēdānta, and lays particular stress on Bhakti, or love and devotion to God, as the surest means of attaining salvation.

Beginning:

एकदा ब्रह्मणः पुत्रास्सनकादयस्तत्त्वविवक्षया पितामहं पप्रच्छुः प्रणिपातपुरस्सरम् अहो पिता निरन्तरं वैकुण्ठाय लीलां ध्यायमानां निर(न्तरं) चिदानन्देन सह संप्रोक्ष्य वदामि यदि रुचिरापद्यतः। चिदानन्दरसं ब्रह्म किं वदन्ति व्यापकतया जगत् व्याप्य तिष्ठति तत् ब्रह्मणः वदन्तितराम्। आपद्यमानौ प्रकृतिपुरुषौ कस्मात् प्रकृतियोज्यता भवति? जीवाः कीदृग्विधाः कस्मात्समुत्पन्ना भवन्ति? तेषां लोका अलोकाः कियत्प्रमाणा यं वदन्ति पुराविदः? पितामह उवाच नारायणमुखाच्छ्रुतोऽयं धर्मः शृणुत सर्वा यैषा सृष्टिस्समुत्पद्यति क्षराक्षराभ्यामधिकः पुरुषोत्तमसंज्ञितः भक्तिगम्यः आनन्दमयो लोकः। . . . .

End:

अहो रसमार्गं प्राप्यमानोऽयं जीवसङ्घ आत्मानं तन्मयतया वासनात्मकं लिङ्गं विधूय आत्मभावमभ्यस्यतां वा या तन्मयतां प्राप्तवानिति। यां यां वासनाम् आत्मा लीयमानो भवति तत्तद्भावेन तं लिङ्गं चोत्पद्यमान आसेदिवानिति। अत्यन्तासक्ततया मार्गोऽयं लिङ्गं विधूय पाप्माभावापत्तौ भवेत् य एषोऽयं मार्गस्ते तव कथितः अयं मार्गो देवादिना न ज्ञातः रुद्रादिना न ज्ञातः। यं मण्डलमुपास्यमानस्तन्मयतां प्रोप्यमाण इदं रहस्यं कथितं न वाचनीयं कस्याचित् त्वया स्वेष्टं हृदि ध्यात्वा तद्भावेन प्रलीयते अहो लक्ष्मीः इमं मार्गं समाश्रित्य भक्ता शरीरसोपाधिधर्मा तद्गुणतां प्राप्यत इति सामगा निरन्तरं रहसि सङ्गीयमाना भवन्ति॥

Colophon:

समाप्तमेतत्सामरहस्योपनिषदं शुभं भवतु॥

यदक्षरपरिभ्रष्टं मात्राहीनं तु यद्भवेत्।
तत्सर्वं क्षम्यतां राधे प्रसीद हरिवल्लभे॥

No. 822. सावित्र्युपनिषत्.

SĀVITRYUPANIṢAD.

Pages, 4. Lines, 19 on a page.

Complete.

Begins on fol. 72*a* of the MS. described under No. 246.

This Upaniṣad teaches the Sāvitrī–Vidyā, describes the various objects in the universe as manifestations of Savitṛ and Sāvitrī, explains the meaning of Gāyatrī, and gives two Mantras—Balā and Atibalā—as a part of this Vidyā, and concludes with the statement that those who conduct religious worship with the aid of this Vidyā reach the world of the sun and thus become saved.

Beginning:

सावित्र्यात्मा पाशुपतं स्वयं ब्रह्मावधूतकम् ।
त्रिपुरातपनं देवि त्रिपुराकठभावना ॥

आप्यायन्त्विति शान्तिः ।

कस्सविता का सावित्री । अग्निरेव सविता पृथिवी सावित्री स यत्राग्निस्तत्पृथिवी ते द्वे योनिस्तदेकं मिथुनम् । कस्सविता का सावित्री । वरुण एव सवितापस्सावित्री स यत्र वरुणस्तदापो यत्र वा आपस्तद्वरुणस्ते द्वे योनिः तदेकं मिथुनम्.

End:

